हेद्यमिति निरसि हः ॥ अथ मङ्गलस्नानं नारदः ॥ लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ॥ हिरण्यं सर्पि
रादित्य आपो राजा तथाष्टमः ॥ मनुः ॥ आदित्यवत्कपिलासत्रीयजा भिन्नतुर्म्महोदधिः दृष्टमाचाः सुनं सेनेत तस्मा
त्यद्धे प्रदावुधः इति ॥ इत्यष्टधा विभक्तस्याह्न आद्यभागकृत्यं ॥ द्वितीये च तथा भागे वेदाभ्यासो विधीय
ते इति ॥ चतुर्विंशतिमते वेदस्वीकरणं तद्विचारोऽभ्यसनं जपः ॥ तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधेति
कौर्म्मे जपेदध्यापयेच्छिष्यान्धारयेद्वै विचारयेत् ॥ अवेक्ष्य च यथाशास्त्रमाथ धर्म्मादीनि द्विजोत्तम इति ॥ दक्षः ॥ समि
त्पुष्पकुशादीनां स कालः समुदाहृत इति ॥ अथ तृतीयभागकृत्यं ॥ दक्षः ॥ तृतीये च तथा भागे पोष्यवर्गार्थसाध
नमिति ॥ पोष्यवर्गस्वरूपमाह ॥ माता पिता गुरुर्भार्य्या प्रजा दीनः समाश्रितः ॥ अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उ श्र ३१

सि॰ श्रा॰ ५९

दाहृतः ॥ पोष्यवर्गार्थं धनमिच्छेत्तु बुद्धिमान् ॥ आत्मनेप इत्यर्थं ॥ याज्ञवल्क्यः ॥ कुसूलकुम्भीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा ॥ जी
वेद्वापि शिलोञ्छेन श्रेयानेषां परः परः इति ॥ स्वकुटुम्बभोजनपर्य्याप्त्यादि न पर्य्याप्तधान्यस्याधारपात्रं कुसूलः ॥ षडहपर्य्याप्त
धान्याधारः कुम्भी ॥ वत्सरार्द्धसमुपात्तेन शिलं ॥ कोशोपादानमुञ्छमिति ॥ याज्ञवल्क्यः ॥ नरात्रः प्रतिग्रहः श्रीपात्रस्तु वृत्त्या
ख्या लब्धवर्त्तिन इति ॥ नारदः ॥ शुचीनामशुचीनां च सन्निपातो यथाम्भसां ॥ समुद्रे समतां यान्ति तथा राज्ञो धनागमः
॥ यथाग्नौ संस्थितं सर्व्वं शुद्धिमायाति काञ्चनं ॥ एवं प्रतिग्रहाः सर्व्वे शुचितां यान्ति राजनीति ॥ तत्रैकस्य प्रतिग्र
हपरः ॥ याज्ञवल्क्यः ॥ कुशाः शाकं पयो मत्स्याः पुष्पं गन्धा दधि क्षितिः ॥ मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि
चाश्रेयाचितं तदाहृतं स्यात्स्वं अपि दुष्कृतकर्म्मणः ॥ अन्यत्र कुलटाषण्ढपतितेभ्यस्तथा द्विषः ॥ अथ चतुर्थभाग
कृत्यं ॥ दक्षः ॥ चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत् ॥ तिलपुष्पकुशादीन्यस्नानं चाकृत्रिमे जले ॥ पस्व
पाशिये ॥ अथ मध्याह्नेऽतीर्थे स्नानमेवस्तु पञ्चम्यां पवित्रा प्रार्थनादिति ॥ यत्तानेनोक्तविधिना स्नात्वा
ज्ञानस्मिन्नप्राग्रस्पयतनप्रतिष्ठीत्यपि तात्र्युचाद्यो सन्ध्ये तत्पूर्वाद्यतिशस्वेः ॥ प्रातः सन्ध्यां सनक्ष
त्रां मध्याह्नस्नानकर्म्मणि ॥ सादित्यां पश्चिमां सन्ध्यामुपासीत यथाविधीति ॥ स्नानकर्म्मणि क्लेतसतीतिशाखा इति स्म
ति चेद्विकार्य्या ॥ माध्याह्निकसन्ध्याप्रकारश्च पूर्व्वमेवोक्तः ॥ अथ पञ्चमहायज्ञाः ॥ याज्ञवल्क्यः ॥ बलिकर्म्मस्वधाहो

Indira Gandhi National
Centre for the Arts

श्रा॰म॰ ३२

नःस्वाध्यायादिति पितृभ्यः स्वधा भूतेभ्यो नम इत्युत्तरं विभजनम् उच्यते। अथ महामखाः॥ आश्वलायनसूत्रे॥ अथातः पञ्च महायज्ञाः स्वयं हो
मः स्वाध्यायादि तिथिसम्भूतपितृमरद्वज्ञसमनुष्याणां महामखाः॥ आश्वलायनस्योक्ता अथातः पञ्चमहायज्ञा वाचयते
ब्रह्मयज्ञो भूतयज्ञः पितृयज्ञो मनुष्ययज्ञ इति॥ तद्यदग्नौ जुहोति स देवयज्ञो यत्स्वाध्यायमधीते स ब्रह्मयज्ञो यद्बलिं करो
ति स भूतयज्ञो यत्पितृभ्यो ददाति स पितृयज्ञो यन्मनुष्येभ्यः स मनुष्ययज्ञ इति तानेतान्यज्ञानहरहः कुर्वीतेति विधी
यते भूतयज्ञो बलिभ्यो ददाति स पितृयज्ञो यन्मनुष्येभ्यः स मनुष्ययज्ञ इतीति नेतोन्यत्रानहरहः कुर्वीतेति विधी ६५
यतेनिसाः। व्यासः। वैश्वदेवं प्रकुर्वीत स्वशाखाविहितं ततः। संस्कृतान्नेहि विविधैर्हविष्यैर्व्यञ्जनान्वितैः। इति
वैश्वदेवपदं देवभूतपितृयज्ञानां नाम।। व्यञ्जनमपि हविष्यमेवं। मन्त्रादिनैतैलादि॥ तथा च स एवानु दुग्धात्ते
पिष्टान्यत्कं तैलक्षारविवर्जितमिति। कोमं। शालाग्नौ लौकिके वापि जले भूम्यामथापि वा। वैश्वदेवस्तु ... क
र्तव्यो देवयज्ञः स वै स्मृत इति॥ लौकिकशाखाग्नौ पाकतो व्यर्थ प्रकल्पते। तत्र होमो देवयज्ञः। बलिर्भूतयज्ञः
। स्वधाकारः पितृयज्ञः एवं च तेनैव पितृयज्ञसिद्धेर्नित्यश्राद्धं नावश्यकं॥ अत एव देवलो नित्यश्राद्धं क
म्प यथाशक्ति तत्कालान्ताहारेण विधिनाश्राद्धं कुर्यात्संवत्सरं सकृत्। निश्चितुर्वीयथान्ने मासे मासेदिने
दिनेऽपीति एवं दर्शश्राद्धमप्यशक्तो संवत्सरे सकृदेवेत्याहाश्वलायनः मासिकं पार्वणं श्राद्धं कृत्तम शक्तानो तुवा
र्षिकमिति। मासिकप्रतिमासं कर्तव्यं। पार्वणादर्शश्राद्धं। वैश्वदेवं चात्मनो नं स्यात्संस्कारार्थः॥ तानेता एम
न्यज्ञानहरहः कुर्वीतेति वचनात्। तथा सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादिति वचनाद्। एकस्य तन्त्रपले सं ३२

स्या माहां गिराः। यस्मिन्नग्नौ जुहुयात्पक्कं तस्मिन्नहोमो वि
धीयते। अत्र वैश्वदेवशब्दो देवभूतपितृयज्ञानां समुदाये ६

पोगस्तत्सत्क्रममिति न्यायात् तत्प्रतिप्रधानं गुणावृत्तिरिति न्यायात्प्रतिपाकं तदावृत्तिः स्यात्संध्यावंदनादिवद्विभक्तानांप
थगनुष्ठानं चस्यादितिःवा चां। पथेकस्मिन्काले पुनःपुनरन्नपच्यते सकृदेव तत्र बलितत्रं कुर्वीत। यथेकस्मिन्काले
नरुधान्नपच्यते गृहपतिर्महानसात्देवतत्र बलितत्रं कुर्वीतेति गोभिलोक्तेः। एतच्च सायंप्रातः कार्यं। अथ सायंप्रा
तः सिद्धस्य हविष्यस्य जुहुयादिति आश्वलायनोक्तेः। उभयत्रासंभवे प्रातरेव द्विगुणं सायं सह वा कार्यं। यच्चोक्तं
तेनैव। प्रातरेव द्विगुणं सायंकुर्याद्वा सह तत्र द्विजः। सायं वाथ दिनं द्वीयात्तत्कृत्वा हानतः स्वपमितिः मनुष्य
यज्ञस्य निमित्ततः। एषाम कालातो प्रायश्चित्तमाहव्यासः॥ होमाद्यदानरहितं न भोक्तव्यं कथंचन। अविभक्ते
षु संस्पृष्टेकेनैव कृततु वा॥ पक्षमलफलैर्वापि पंचयज्ञान्समापयेत्। अकृत्वा पंचयज्ञांस्तु भुक्त्वा श्रे६
चान्द्रायणं चरेदिति॥ आश्वलायनः। वसतामेकेन विभक्तानामविभक्तानां एकस्तु चतुरो यज्ञान्कुर्याद्धापह
र्वकानु। वाम्यतो ब्रह्मयज्ञः। अविभक्ता विभक्ताश्च पृथक् पाकाद्विजातयः कुर्युः पृथक्पृथक् यज्ञान्भो
जनात्प्राग्दिने दिने। पृथग्गृह्यैकपाकानां ब्रह्मयज्ञो द्विजन्मनां। स्नातकाध्येस्वभ्युद्धात्मानं कुर्यान्नित्यकारयु
न इति॥ अत्राविभक्तानां पाके पृथग्वैश्वदेवानुष्ठानं नाद्रियंते शिष्टाः॥ प्रवीतस वीरतगोभिलवचो विरोधे
कतिपयाहताश्वलायनवचसो वाधात्। विकल्प इति केचित्। आपत्तु हरदत्तः। स्नातकम् अप्यविभक्तपक्षमित्याश्व

आ॰ म॰ ३३ त्यागेनत्याज्यः॥ताने तान हर हर कुर्वीनेतिस्मृतकेकर्मणांत्यागः संध्यादीनांविधीयत इत्यादिना बाधितानां प्र
तिप्रसवेनैवसार्थस्वावलयं तत्तु न भवतितस्यद्वाँमध्यायोपरात्मासुर्निर्षिधदेशइति स्मृत्यन्तरात्तत्रापंचयज्ञविधा
नंतु न कुर्यान्नतिजन्म नोरितिदेवलोक्तेः॥अहरहःकुर्वीतेतितुसंध्यावंदनादिवन्नित्यतामात्रबोधकं॥अतस्ए
वस्मसंतरे॥आपत्रमपि रातव्यं आकाष्ठमपितुतुष्याद्यास्वमपि अस्यपत्तं कुर्यादिति॥चतुर्विंशतो॥अलाभे
येन केनापि फलशाकादिभिः क्षिर यपयोदधिघतैर्वा पिवैश्वदेवं स्तुवेरातु॥हस्तेनान्नादिभिः कुर्यात्तस्मि
न्निरंजलिनाजले॥ परिशिष्टेऽप्युक्ते न तु हस्तेनत्वंगुष्ठाग्रेणापीडितं॥संहतांगुलिपाणिस्तु वाग्यतो जुहु
मादिति॥परिशिष्टेपि॥शाकं वा यदि वा पत्रं मूलं वा यदि वा फलं॥संकल्पयेद्यदाहारस्तेनैवजुहुयादपि
स्मृत्यंतरेपि॥कोद्रवं चणकं माषंमसूरं चकुलत्थकं॥क्षारं च लवणं सर्वं वैश्वदेवे विवर्जयेत्॥हविष्यान्ना
वेहाराद्दिभिरपिवैश्वदेवे शान्त्यामुत्सन्नमस्तनिहोतव्यमिस्याहापस्तंबः॥नक्षारलवणहोमो विद्यते तथा
पराल्लसंस्यष्टस्याहविष्यस्य होमे उदीचीनमुष्णंभस्मापोह्यतस्मिन्जुहुयात्तद्धुतमहुतंचाग्नेर्भवतीति॥वृद्ध
वसिष्ठः॥अनग्निकस्तु यो विप्रः सोन्नं व्याहृतिभिस्स्वयं हुत्वा शाकलमंत्रैश्च॥शिष्टं काकबलिं हरेदिति॥वो ऽम
धापनं॥प्रवासं गच्छतापस्य गृहे कर्त्तानविद्यते॥बंधवा नामहत्ताभेषां सपत्नीः सह गच्छतीति॥आहा ३३



त्रिः पुत्रो भ्राताथवाऽऽत्विक् शिष्यश्च श्वशुरमातुलाः॥पत्नी स्त्री त्रिषयात्पात्र हरेयुस्तु बलिकर्मणि॥एतेनेच प्रवसतः प्रतिनि
धयः॥प्रलयपतस्य पारप्राप्तस्यपत्नीतः॥ रतावाधते आश्वलायनः॥स्वगृह्यविधिना कृत्वा प्रलयतां पुराहितमस्याध्या
पतेपेरणा॥ पाकारहमेसान्वरे स्मरा निति॥ पत्नुहृत्स्यतिः॥ सचावीत्कर्पणात्कार्यः पश्चाद्याप्रा तरा हुतेः॥वैश्वदेवाव सा
नेवानात्यत्र तेनिमित्र तरति तरा आश्वलायनान्यपरं॥आश्वलायनानां तर्पणास्योत्तराणां त्वेनैवतत्स्त्राप्यापूर
वीक्तर्पणादित्यस्यतरितराश्रलेव सार्थकात्॥तस्याहवर्षास्पष्ठाहेतिवैश्वदेवावसानेवलेत स्पितान्त्रलेवा
कर्परिकायां॥दर्भान्वहू शम्भु चोरेहोप्रागग्नानास्तरणास्तथा॥दर्भैषुयविशेल्क मेणपत्रद्गाडनुसवएवसन्नु॥ कृत्वो
पस्थकरसव्येऽप्युक्तो न प्राग्निरांगुलोपवित्रेस्थापयेदुक्ते प्रागग्रेदक्षिणोनतु॥ स्पं चप्रांगरांगुलंतेन संरक्षा
इत्विरणां करमितितंत्रेवास्त्र ज्ञाघन्यत मंपर्वमभिर्मसंति शक्तितः॥ॐ पृथ्वीव्याहृतीत्ति स्वःसमस्ताश्चै
स्त्व सकृद्धरेत॥पक्षस्व ऊर्ध्वं शःसर्वासा वित्रीमभिवदेस्वेपक्षे॥ शैनिकः॥ततोप्रावत्ततिद्यातमध्यायं स्वक्तमेववा
४२ ऋचं वाप्युततोव स्पमधीयीतस्वशक्तितइति॥ ऋविधाने॥ आग्नेयं स्वक्तमाघं तु पुरापन्नहस्तं सर्वं समंतं॥ ५३
रापस्यापार्थकरं घस्तपापविप्रोर्यमाप्नुयात्॥ऋचं सर्वामिमां ज स्वास पतो नियतः शुचिः॥संहिताफलमा
प्नोतिऋग्वेदस्य न संशयः इति॥तथा॥अग्निमीले जपेत्सूक्तं पाप प्रणश्री करेपहापापरापरा फलं तस्य

Indira Gandhi National
Centre for the Arts

तेनास्यानुदत्तस्य शब्द इति । आश्वलायनगृह्ये ॥ सयावन्मात्रं ततावद्वर्षीलेनयापरिदधाति । नमो व त्सरो नमो स्वस्त्ययेन
आ॰ म॰ विरामास्यान्तरूलशर इति । आश्वलायनगृह्ये ॥ सयावन्मन्येतता वर्षीलेनयापरिदधाति नमो ब्रह्मणे नमो वाचस्पतये नमो विष्णवे महते करोमीति त्रि नोच्चैः पठेत्। नमो ब्रह्मणे
२४ मः पृथिव्यै नम ओषधीभ्यः नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमीति इति त्रिः । उपवेशनाशक्तो वाश्वलायनगृह्ये स यदि तिष्ठन् गच्छन् आसीन
लशा इति परिधानी । याजनेत्वा हेतिस्कं तः । उपवेशनाशक्तौ वाश्वलायनगृह्ये स यदि तिष्ठन् गच्छन् वा आसी
नः शयानो वा यं यं क्रतुमधीते तेन हास्य क्रतुनेष्टं भवतीति विज्ञायते तस्य ध्यानध्यायो यदाऽस्याऽत्र भुवि
यं दृश इति । ह्रुविसृत धन्यायात तर परि संख्यार्थं केषु [illegible] मिति कानध्यायिषु विशेष माहापस्तम्बः । अथ यदि
वातो वा या तक्त नु ये ह्लाविधोतते वा स्तनयेद्वा [illegible] के वर्चमेकं वा यजुरेकं वा साममभिव्याहरेत् भूर्भुवः स्वः सत्यं त
हो॰ पः श्रद्धायां जुहोमीति । अथ तर्पणं आश्वलायनगृह्ये । देवतास्तर्पयति प्रजापतिर्ब्रह्मा वेदा देवा ऋषयः सर्वाणि
छन्दांस्योंकारो वषट्कारो व्याहृतयः सावित्री यज्ञा द्यावापृथिवी अन्तरिक्षमहोरात्राणि संख्याः सिद्धाः समुद्रा नद्यो
गिरयः क्षेत्रौषधिवनस्पतिगन्धर्वाप्सरसो नागा वयांसि गावः साध्या विप्रा यक्षा रक्षांसि भूतान्येवमन्तानि । अथ
ऋषयः शतर्चिनो माध्यमाः गृत्समदो विश्वामित्रो वामदेवोऽत्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्यः ॥ तम
क्षुद्रसूक्ता महासूक्ता इति प्राचीनावीती सुमन्तु जैमिनि वैशम्पायन पैलसूत्रभाष्यभारतमहाभारतधर्मा २४
चार्या जानन्ति बाहवि गार्ग्य गौतम शाकल्य बाभ्रव्य माण्डव्य माण्डूकेया गार्गी वाचक्नवी वडवा प्रातिथेयी सु
१६
लभा मैत्रेयी कहोलं कौषीतकं पैङ्ग्यं महापैङ्ग्यं सुयज्ञं सांख्यायनं ऐतरेयं महैतरेयं बाष्कलं शाकलं शाकपूणिं सुजा
तवक्त्रं औदवाहिं महौदवाहिं सौजामिं शौनकमाश्वलायनं ये चान्ये आचार्यास्ते सर्वे तृप्यन्तु प्रतिपुरुषं पि
तरस्तर्पयित्वेति । अत्र प्रजापत्याद्येवमन्तानीत्यन्तानां एकोनत्रिंशन्मन्त्राः २९ । अथ ऋषय इति तु न मन्त्रः । शतर्चि
न इत्याद्या महासूक्तान्ता द्वादश १२ । सुमन्तु इत्याद्याः पञ्चाशत्तु इतो द्वाविंशति २२ तेषां तृप्यन्तु तृ प्यन्ता
नरत्या घाम हासूक्तान्ता द्वादश १२ । सुमन्त्वित्याद्याः पश्चाशत् द्वाविंशति मन्त्राः इति नारायणवृत्तौ । महासूक्तान्त
तृप्यन्त्विति यथायोगमध्याहृत्य प्रयोगः । एवमन्तानीति भिन्नो मन्त्र इति नारायणवृत्तौ । महासूक्तान्त
पवित्रस्यानन्तरं पूर्वोक्ताः सनकाद्यः संप्रतर्प्याः । द्यावापृथिवी तृप्येतामिति लोडात्मनेपदं प्रयुञ्जते
वहव । तन्नाधातोः परस्मैपदित्वात् लिङिति परस्मैपदं भवेत् । तत्र तु काशकाशौनकाद्युक्तं तृप्यतु तृप्य
न्तामिति । तद्विरुद्धप्रायपाठविरोधः । तेन द्यावापृथिवी तृप्यतामित्येव प्रयोज्यमिति मदीयो विधिः । एतावत्का त्विक्षो ॥ अ
पां समीपमागत्य तर्पयेद्देवताः । एवमन्तानि तृप्यन्त्विति तेभ्यः प्रतिमन्त्रं । प्रजापतिस्तृप्यत्विति
देवतीर्थेनः । धातुस्तर्पयेद्यथालिङ्गं मन्त्रान्तेषु प्रयुज्यत इति शौनकोपि । मन्त्रैः प्रजापतिस्तृप्यत्विति
रन्यय थादिनैः । एवमन्तानि तृप्यन्त्विति एवमन्तैर्यथाक्रममिति कहोलादिद्याऽश्वलायनोऽन्वे पितृन्
याहि न तर्पयेत् रादेवादीनामरवीभिः त्वा नरकं प्रतिपद्यते । मन्म पारिजाते स्मृत हि ॥ अन्वारभ्ये न सव्ये
तेषु षोडशसु द्वितीया नेषु तर्पयामीति
शेषो जन्यः योग्यत्वात् तेषां तर्पणानि
Indira Gandhi National
Centre for the Arts

अ॰ म॰ नपशिखा। दक्षिणेन तु सव्येन तु तस्य पाणिना॥ अथवा तर्पणं भवेत् तस्य चान्वारब्धेनैकेनैव दक्षिणेन पाणिना इति तु आ

३५ श्वलायनपरं॥ पाणिभ्यामिति तत्स्यात्तीति एवं केचित् न वक्तव्यं तु विशेषः कारिका। प्राचीनावीत

थेन नीतर्पयेत् पितृतीर्थेन इति। व्यासः। एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः। अर्हन्ति पितरस्त्रींस्त्रीन् स्त्रियः

एकैकमञ्जलिमिति। योगयाज्ञवल्क्यः। सनक सनन्दन सनातनः कपिल आसुरि

वोढुः पञ्चशिखस्तथा॥ एते ब्रह्मसुताः सप्त तर्पणीया मनुष्याः परिकीर्तिता इति एतदाश्वलायनान्यपरं तेषां

तर्पणे नोदकं शौवनस्य तोक्तत्वादिति केचित्। सनकादयो पितृभ्यां दद्यात् इत्यर्थः॥ इति तु युक्तं। कासुचित्स्त्रीषु

विशेषमाह संख्यायनः। मातृमुख्यास्तु या स्त्रियस्तासां त्रीनञ्जलीन् त्रयं तदानीं॥ इति॥ सापत्नावायपृ

त्नीनां द्वौ द्वौ दद्यात् तदञ्जलीन् इति। अत्र विशेषमाह हारीतः। वसिष्ठा वसेन्मुखं स्थले विस्तीर्णे

३८ बर्हिषि। विधिवत् तर्पणं कुर्यात् पात्रेषु कृतवत्। पात्राद् जलमादाय शुभे पात्रान्तरे क्षिपेत्। जलपूर्णे

प्य वापीन स्थले तु विबर्हिषीति। पितामहः। हैमं रूप्यमयं पात्रं ताम्रं कांस्यं समुद्भवं पितॄणां तर्पणे पात्रे

मृन्मयं तु परित्यजेत् इति। ग्राह्यः। उद्धृत्योदकं दद्यात् पितृभ्य अञ्जलिं चन। उत्तीर्य च शुचौ देशे कुर्या राम

दुदकतर्पणमिति अग्निपुराणे॥ प्रागग्रेषु सुरांस्तर्प्य मनुष्यांश्चैव मध्यतः पितॄंस्तु दक्षिणाग्रेषु ३५

ए कश्चित् क्षिप्तांजली निति मरीचिः। सौवर्णेन च पात्रेण ताम्ररूप्यमयेन वा॥ औदुंबरेण खड्गेन पितॄणां दत्तमक्षयमि

ति विष्णुः॥ पञ्चासु विस्थलं वास्य दुदकेदेवताः पितृश्च॥ तर्पये तु यथाकर्म अक्षय्यं प्रतिष्ठितमिति योग

याज्ञवल्क्यः। यत्र वस्ते निर्भिन्ने तु तिलान् मिश्रयेत्तत्र लोका तु तथा तु सव्येन तिलाग्राह्या विचक्षणैः॥

अन्यथा इति अनुकृतेन तर्पणं इत्यर्थः। गोभिलः। रोमसंस्था तिला नरकं रवाय स्कन्दं तर्पयते पितॄन् पितरस्त

र्पितास्तेन रुधिरेणामलेन च इति। स्मृतिभास्करे कुशाग्रैस्तर्पयेद्देवान् मनुष्यान् कुशमध्यतः द्विगुणीकृत

३६ मूलाग्रैः पितॄन् संतर्पयेद्विज इति योगयाज्ञवल्क्यः। कव्यवालोनलः सोमो यमश्चैवार्यमा तथा॥ अग्निष्वा

त्ताः सोमपाश्चैव तथा बर्हिषदोऽपि च॥ परिकीर्तिताः पितृगणाः इत्या ततः पितॄनिति॥ अत्र कव्यवा

लं तर्पयामीति कव्यवालस्त्वर्थतृप्यतामिति वा प्रयोगः। एवमनलादिषु अथ पित्रादितर्पणे विशेषमा

ह बोपदेवः। तातं तातं च पितामहं सपत्नीजननीं मातामहादित्रयं सस्त्रीस्त्री तनयादि तात जननी स्वभ्रातरः स

स्त्रियः॥ तातं वा त्मभगिन्यपसधवपुत्रानपि तासदुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा

तर्पणे इति॥ तातं तातं वा त्रीन् पितॄन् पित्रादित्रयं मात्रादित्रयं मातामहादित्रयं सस्त्रीति सपत्नीकं तर्पयामी

ति प्रयोगः। अपसधवपुत्रिति। सापत्न्यां सधवां तर्पयामी त्यर्थः॥ क्रमात रम्रघदकस्यस्यनरा॥

माधवीये सत्यव्रतः॥ पितृभ्यः प्रथमं दद्यात् ततो मातृभ्य एव च॥ ततो मातामहानां च पितृव्यस्य सुतस्य चेति॥ हारीतः। पि

त्रादीन् मात्रादीन् मातामहादीन् पितृव्यान् सपत्नीः ज्येष्ठभ्रातॄन् सपत्नीः मातुलान् सपत्नीः गुर्वाचार्योपाध्यायान्

[illegible]

Indira Gandhi National
Centre for the Arts

श्राम
३६
आदौ पिता ततो माता सपत्नजननी तथा। मातामहाः सपत्नीकाः स्वपत्नी तदनंतरं॥ सुतभ्रातृपितृव्याश्च मातुलाश्च सभार्य
काः॥ दुहिता भगिनी चैव दौहित्रो भागिनेयकः। पितृष्वसा मातृष्वसा श्वशुरो गुरुस्तथैव हि॥ इति। प्रयोगपारिजाते संग्र
हे पितृमातृमातामहाः पितृव्यो भ्रातरः सुतः पितृष्वसा मातुलाश्च नप्ता मायस्व जामयः॥ भार्या भगिन्यो दुहिताश्च
श्वशुरो भावुकाः स्नुषाः॥ श्याकलो गुरुराचार्यः स्वामी मित्रं यथाक्रममिति॥ स्वजामयः स्वभगिन्यः। भावुका भगिनीपतयः
॥ एतेषां च क्रमाराग्रमेच्छिको विकल्पः॥ तत्र विशेषमाह पद्मः॥ संबंधनामगोत्रैश्च स्वधांतेन नमो ततः वस्त्रादिरू
पं निरीक्ष्य तर्पयेत्पितृपूर्वकमिति। वसिष्ठः॥ संबंधमनुकीर्त्यैव नामगोत्रमनंतरं। वस्त्रादिरूपं संकीर्त्य स्वधा
कारेण तर्पयेदिति॥ अत्र आत्मपितरममुकशर्माणममुकगोत्रं वसुरूपं स्वधा नमस्तर्पयामीत्यादि प्रयोगः॥ अशक्तौ सं
क्षेप तर्पणं विष्णुपुराणे॥ आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति ब्रुवन्॥ क्षिपेत्तोयांजलीस्त्रीन्वै कुर्वन्संक्षेपतर्प
णं॥ अत्र पंजलिमाह कात्यायनः। पितृवंशपा मातृवंशपा ये चान्ये मत्त उदकमर्हंति तांस्तर्पयामीत्यवसाञ्जलिमि
ति॥ ततः सूर्यायार्घ्यदानमुक्तं विष्णुपुराणे॥ दत्वा कामोदकं सम्यगेतेभ्यः श्रद्धयान्वितः॥ आचम्य च ततो दद्यात्सू
र्याय सलिलांजलिं॥ नमो विवस्वते ब्रह्मन्भास्वते विष्णुतेजसे। जगत्सवित्रे शुचये सवित्रे कर्मदायिने श्राम ३६
इति॥ ततश्चाचम्य हस्ताभ्यां कुशान्संत्यजेत्॥ तथा च रत्नावल्यां॥ वाक्यैरपि उदानेवन तर्पणात् श्राद्धकर्म

णां आचांतः सम्प्रकुर्वीत इमं संतृप्तनं बुध इति॥ तत्र मंत्रो पितृतीर्थेन येषां पिता न च भ्राता न पुत्रो नान्यगोत्रिणः॥ ते
सर्वे तृप्तिमायांतु मया त्यक्तैः कुशैस्तथेति॥ ततो भूमौ वस्त्रं निष्पीडयेत्॥ तथा च भरद्वाजः॥ वस्त्रैकमपेक्ष
तेषां म तावस्सकर्मणः॥ तस्मात्सर्वप्रयत्नेन जलं भूमौ निपातयेत्। ज्ञानकारेनादितर्पणात्कृत्वा वस्त्रनिष्पीडनं शोध
पितृणां तृप्तिर्विप्रेन्द्राः पितृगणैः सह॥ वायुरूपा निष्ठंति तृषितास्ते जलार्थिनः। निशारे सत्रिवर्तन्ते व अं को
स्त्रनिष्पीडने कृते॥ तस्मान्नपीडयेद्वस्त्रमकृते तर्पणे द्विज इति॥ अथ भीष्मतर्पणं॥ व्यासः॥ अष्टम्यां तु माघस्य द पद्य ६
द्या भीष्माय यो जलं। संवत्सरकृतं पापं तत्क्षणादेव नश्यति॥ तत्रायं मंत्रः॥ वैयाघ्रपादगोत्राय सांकृत्यप्रवराप लं ७
च॥ गंगापुत्राय भीष्माय प्रदास्येहं तिलोदकं॥ अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे॥ इति भीष्मतर्पणं॥ अथ यम
तर्पणं॥ वृद्धमनुः॥ दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्पणं॥ कृष्णांगारचतुर्दश्यामपि कार्यं सदैव वा इति॥ इह जन्म श्राप
कृतं पापमन्यजन्मार्जितं च यत्॥ कृष्णांगारचतुर्दश्यां तर्पणं स्नानपूर्वकं इति। स्मृतिचंद्रिकायां। यमाय धर्मराजाय
मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने॥ वृको
दराय चित्राय चित्रगुप्ताय ते नमः॥ चतुर्दशैते मंत्राः स्युः प्रत्येकं तु ... एकैकेन तिलैर्मिश्रांस्त्री
स्त्रीन्दद्याज्जलांजलीन्। यावज्जीवकृतं पापं तत्क्षणादेव नश्यति॥ श्लोकमो तमः। यमो निहंता

Indira Gandhi National Centre for the Arts

चतु२

श्रा॰ म॰ पितृधर्मराजौ वैवस्वतो दंडधरश्च कालः प्रेताधिपो दत्तकृतानुसारी कृतांत एतद्दशभिर्जपंति ॥ इति दशभिराह्वानिभिः ॥ व्यासः
३० । तथा कृष्णे दंडपाय माघे स्याद्दसपूर्णिमः । सप्तोदकांजलीन्दद्यात्सर्वपापैः प्रमुच्यते । स्कांदे । दक्षिणाभिमुखो भूत्वा तिला
श्च मधुसमाहितः । देवतीर्थे न देवत्वात्तिलैः प्रेताधिपो यतः । सव्यं तिसांतोयज्ञोपवीतिना कार्यं प्राचीनावीतिनापि वा
देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता ॥ इति यमतर्पणं ॥ अथ तर्पणे तिलनिषेधः । संग्रहे । नंदायां भार्गवदिने कृ प्रयोगपारिजाते
त्तिकासु मघासु च । भरण्यां भानुवारे च गजच्छायाक्षये तथा । अयनद्वितये चैव मन्वादिषु युगादिषु । पिंडदानं
मृदा स्नानं न कुर्यात्तिलतर्पणं ॥ मरीचिः ॥ सप्तम्यां रविवारे च स्वगृहे जन्मदिने तथा । भृत्यपुत्रकलत्रार्थी न कु ४
र्यात्तिलतर्पणं ॥ बौधायनः ॥ सप्तम्यां रविवारे च मातापित्रोः क्षयाहनि । तिलैर्यस्तर्पणं कुर्यात्स भवेत्पितृ
घातकः ॥ सप्तमीरविशब्दौ निमित्तमिति केचित् ॥ तत्रापि विशेषणविशेष्यभावविनिगमनाविरहात् कथं
चित्तस्य [illegible] निमित्तविशेषणाम क्वचिच्छ्रुतमेवा [illegible] विरागिमादौ [illegible] सप्तमीरवि
हजन्मदिनानाम [illegible] परस्परविशिष्टानामेव निमित्ततापत्तेश्च अधिकारिविशेषणकृतेश्व
र सपुत्रादिकामस्यैवायं निषेधः । न तु विधुरादेः ॥ स्मृत्यंतरे ॥ विवाहव्रतचूडासु वर्षमर्धं तदर्धकं ॥ तम ३७

।तमा॥ पक्षयोरुभयो राजन्सप्तम्यां निशि संध्ययोः । विद्यापुत्रकलत्रार्थी तिलान्संच स्वर्जयेत्ते
माघे मघे त्रयोदश्यां नंदाभृगुमघासु च पिंडदानं मृदास्नानं न कुर्यात्तिलतर्पणं ॥ ५

न१

पिंडदानं मृदास्नानं कुर्यात्तिलतर्पणमिति बौधायनः ॥ विवाहे चोपनयने चौले सति यथाक्रमं । वर्षमर्धं तदर्धं च नैव
कुर्यात्तिलतर्पणं । संस्कारेषु तथान्येषु जातपुंसवनादिषु ॥ यावन्मासः समाप्येत तावत्पिंडांश्च वर्जयेत् । तद्द्वावन
नरं प्राप्तस्तत्रैव तिलतर्पणमिति । वृद्धमनुः ॥ संक्रांत्यादिनिमित्तेषु स्नानांगेन पैतृकतया ॥ तिथिवारनिषे
२८ धविततिलैस्तर्पणमाचरेदिति कात्यायनः ॥ उपरागे पितुः श्राद्धे पाते मायां च संक्रमे । निषेधेपि हि सर्वत्र ति
लैस्तर्पणमाचरेदिति । व्यतीपातो वैधृतेः पितावपितृव्यादिरूपलक्षणं ॥ संक्रांतिरयनमिति पारिजाते
इति तर्पणप्रकरणं ॥ अथ देवयज्ञः ॥ कूर्मपुराणे । ब्रह्माणं शंकरं सूर्यं तथैव मधुसूदनं ॥ अन्यांश्चा
भिमतान्देवान्भक्त्याचाक्रोधनो नरः ॥ पूजयेत् [illegible] ये [illegible] पत्रैः पुष्पैस्तथांबुभिः । गंधपुष्पमात्रं प
चोपचारादिसंभवतीति तिथितत्त्वे । नृसिंहपुराणे ॥ जले देवं नमस्कृत्य ततो गेहे गृहे बुधः । पौरुषेण तु सूक्तेन
ततो विष्णुं समर्चयेदिति ॥ स्कांदे । ब्रह्मभूत युगे देवस्त्रेतायां भगवान्रविः । द्वापरे भगवान्विष्णुः कलौ देवो म
हेश्वर इति ॥ मंत्रा वैदिका नाम मंत्रा वा [illegible] तत्र सचतुर्थ्यंतेन ॐकारादिसंयुक्तेन नमस्कारांतकीर्तितां ॥ स्वना
म सर्वसत्त्वानां मंत्र इत्यभिधीयते ॥ अनेनैव विधानेन गंधपुष्पाणि विन्यसेत् । एकैकस्य प्रकुर्वीत यथोदि
ष्टक्रमेण तु इति ॥ तत्रैव ॥ मंत्राकृतगुणा प्रोक्ता मंत्रा लक्षगुणोत्तरं ॥ भक्त्यमेत्र समं तत्तु कोटिकोटिगुणोत्तरं

Indira Gandhi National Centre for the Arts

श्रा.प० रामहामारते॥ कलौ कलिमलध्वंसं सर्वपापहरं हरिं। येर्चयंति नरा नित्यं तेपि वंद्या यथा हरिः॥ नियमविधिरयं ननु परिसंख्या
३८ एवं च सर्वयुगेषु सर्वेषां पूजन न निषिध्यते तथा॥ अत एव [illegible] पंचायतन स्थापन प्रकारो ज्ञानमाला (सर्वं ?)
यां प्रोक्तः शंकरं मध्ये ईशान्यां श्रीपतिं यजेत्। आग्नेय्यां च तथा हेरंबं नैरृत्यां तपनं तथा। वायव्यां च सदा पूज्या भवा
नी भक्तवत्सला॥ यदा तु मध्ये गोविंदं ईशान्यां शंकरं यजेत्। आग्नेय्यां गणनाथं च नैरृत्यां तपनं तथा। वायव्या
मंबिकां चैव पंचैतन् त्रीसमाहितः॥ सहस्रांशुं यदा मध्ये ईशान्यां पार्वतीपतिं। आग्नेय्यामेकदंतं च नैरृत्यां माधवं
तथा॥ वायव्यां पूजयेद्देवीं योगमायैकभूमिकां॥ भवानीं तु यदा मध्ये ईशान्यां माधवं यजेत्। आग्नेय्यां पार्वती
नाथं नैरृत्यां गणनायकं॥ प्रधानं तु वायव्यामार्चयेत्सु प्रयत्नतः हेरंबं तु यदा मध्ये ईशान्यां म[illegible]
[illegible]
[illegible] नपजेत्। आग्नेय्यां पंचवक्त्रं तु नैरृत्यां जगदंबिकां॥ वायव्यां पूजयेत्सूर्यं मंत्री स्वतंत्रितः॥ स्व
स्थानवर्जिता देवाः शोकदुःखभयप्रदाः॥ तस्मादुक्तस्थितो राज्ञा साधकश्चाविनश्यतीति॥ वा पं देवः शंभोर्म
ध्यगते हरीनहरन्ह स्यो हरो शंकरे भास्वनागसुनार वो हरिगणेशाजो विकाः स्थापिताः देव्यां विस्तु हरे क
दंतस्वयोर्वा हरेब्ज्वारे नायीः शंकरभागतो तिसुखहा व्यास्तुतहानिदा इति॥ अत्र पंचानां मध्ये कस्या राम
३८
२१

वाहनादि नमस्कारांतं पूजां कृत्वा परस्यापी सेवं कार्यं अनुसमयत्सुस्थे पुष्पांजलिं दत्वा गणेशाद्यर्चने भवेन्नागसा
राएव मुख्यश्चेत्तत्र सर्वपक्षमाश्वेदितिवचनेनामाभिधानात्॥ मुख्यप्रधानदेवताया पुष्पांजलिशेषं न्यवतरत्तायु न
लक्ष्यते पुष्पांजलेस्तु तदेवाविजीयत इति शारदातिलकटीकायां॥ पुस्तुतु मुख्यलोक्तात तन्त्राति योगिकां गत्वा लाभे नन्वे
धि० कप्रयोगविपरिकल्पनं तेनैव कका लत्वावगतेः॥ वैश्वदेवीकृत्वा प्राणापन्मिअरतीतिवत्। सर्वेषामावाहनं ततः
स्थापनमितिपुराणांतु तमपएव सत्तु मध्ये पूज्यो जस्य नायज्ञा कृत्वा परेवता पूजा कार्येति दिक्॥ भविष्यसु
रातो। पुष्पैरराणपसम्भवैः पत्रैर्वा गिरिसंभवैः॥ अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जंतुवर्जितैः॥ आत्मारामोद्भवै
र्वापि भक्त्या संपूजयेत्सुरान्॥ कृमिकीटावपन्नानि शीर्णपर्युषितानि च। स्वयं पतितपुष्पाणि त्यजेदुप
हितानि च। उपहितानि मलादिभिः॥ मुकुलेनार्चयेद्देवमपक्वेन निवेदयेत्। फलं च कृमिवद्धं च प्रयत्नात्तद्वि
वर्जयेत्॥ अलाभे तु सुपुष्पाणां पत्राण्यपि निवेदयेत्। पत्राणामप्यलाभे तु फलान्यपि निवेदयेत्। फला
नामप्यलाभे तु तृणगुल्मौषधीरपि॥ औषधीनामलाभे तु भक्त्या भवति पूजितः॥ प्रत्येकमुक्तपुष्पाणां
दशांशो वर्णाकं फलं। त्रिपिष्ट [illegible] पत्रो हृल तेर्देवा हूरायां भवेत् विष्णुधर्मोत्तरे धर्मार्जितधनक्रीतैः पं
कृपीलि श्री घा चीनं दूरीश्यस संदेहात्स तत्र चास्त्येयापराणि ति विप्रातिपक्कपरं। समितपुष्पकुशादि
८२

Indira Gandhi National Centre for the Arts

श्री२

निर्माल्यगा:स्वयमाहरेत्स्वयमानीतैः पत्रैस्तैः कर्मकुर्वन्पतत्यधइतिभविष्ये॥ न्नालसाम्रहरादिति आत्स्वरसाः लक्षपुष्पा
वैनाहेतुत्रयस्त्रीतमिश्रिमिन्नकोशाकारः सम्मितपुष्पकुशादीनिवहृतंनाभिवारयेत॥ तथाशैवेवनान्यान्हिनिर्माल्यं
तद्वैवत्तयोः। तयोर्देवोपरिध्रतयच्चवामहस्तेधृतंचपत॥ अधोवस्त्रधृतंयच्चद्दैलैतैःसालितंचपत्र॥ देवता
स्तन्नगृह्णतिपुष्पनिर्माल्यताग्नमिति। निसृष्टजार्थपरीपवनोत्पविग्रहंनचतत्त्रौयं देवतार्थंचकु
सुमं अस्तेयमनुरब्रवीत॥ इतिवचनात॥ परजार्थसुष्पाद्नेनपापंचैव। पापंचितैःपत्रपुष्पाद्यैर्यःकरोति
ममार्चनमितिवाराहेतस्यापराधिषुगणितत्वात्॥ भविष्यत्सुताशेप्रहरंतिष्ठेतजातीकरवीरमहने
शःतुलसीबिल्वपत्रेषुजलजेषुचसर्वशः॥ नपर्युषितदोषोस्तिमालाकारगृहेषुच॥ मुकुराशोकदं
बानिरात्रौदेयानिभास्करे॥ कनकानिकरवीराणिरात्रौदेयानिशंकरे। दिवाचाम्यानिपुष्पाणितदिचारा
त्रौचमालिकां॥ तत्रैव। जातीशमीकुशाःकुंकुममल्लिकाकरंजोनागपुन्नागकाशोकरक्तनीलोत्स <u>वीरउ</u>
लबिल्वचंपककदकुलंचैवपद्मविल्वपविन्न कं॥ एतानिसर्वदेवानांविहितानिसमानिच कुंकु
जा का। नागनागकेसरं। पाटलावच्छ नीपन्न दुर्गायाल्लाहिताहितैः। विहितंप्रतिषिद्धंचे

सर्वः कुंरपलाशकुसुमंदूर्वेस्वाशिवपद्मजेन। कुमुदंकुंकुमं द्रोणंनागरस्सर्वपद्मजेनेविहितनिषिद्धानिस्वर्य: कुंकुम
मत्रपुष्पं अवकः कर्त्ताकारस्तुकिंकिरातोहेरलत्थ्या॥ किंकिरात्पीताम्लकः। तिलकमालतीवारास्तुलसी
मंगराजकान मैलशिवदुर्गायैनिषिद्धंविहितंभवेत्वाराक्रसला इतिप्रसिद्धः। जपः कोशःस्वेपस्त्वेत्व <u>न२</u>
महारकेतथा॥ दुर्गायाश्चवविस्नोश्चनिषिद्धंविहितंभवेत् जयोजयंती आगस्तिरतिमुक्तश्चतिरीटंचह
रेहरौ॥ श्रीपामार्गस्यपुष्पंचदुर्गायाअहिताहितं॥ अतिमुक्तोमाधवीलता॥ तिरीटलोध्रोधुत्तूरःशि
पापुष्पंमंदारस्त्वपराजिता। सर्वंविष्णोर्नहितंसमनं। शिवस्सूर्ययोःअयशिवेनिषिद्धं नि। केतकीचा
तिमुक्तश्चकुंसेयथोमदंतिका। शिरीषसर्जंवंधूककुसुमानिविवर्जयेत। अकोलपचकुसुमंकरंजेश्च
हस्वं। विभीतकानीति। सर्जःशालः इंद्रतरुःसिंधुवार। शिवेविवर्जयेल्कुंदउन्मत्तंचतथाहरौस्त्वा
नामर्कमंदारौसूर्यस्यनगरंतथाइतिविस्नुः। अर्केनिबधोदुर्गेतरेवीविषय। दुर्गाघ्रजाधिकार
करवीरएकपुष्पेरक्तमाल्यात। विस्नोतुविस्नुः नोग्नगंधानितागंधानिपुष्पाणिनकंटकितं।
[illegible]। कंटकितमपिशुक्लंसुगंध्यमिदद्यात्तानरक्तंदद्यात्तारक्तमपिकुंकुमं जलजंचदद्यात् स
(केसरं)

Indira Gandhi National
Centre for the Arts

आ॰म॰
४०

जलजान्यपि पाटला निर्गुण्ड्या करवीरयास्मिन्द्र शमीपत्रपलाशाशोककुशावर्द्देन दद्यात् । विष्णुधर्मोत्तरे कुटजशाल्मली
पुष्पं शैरीषकं कच धत्तूरकस्य पुष्पार्कं च विशेषेण विष्णुः । नरसिंहपुराणे मालत्यापि नाघ्राताहि सेसति निर्माल्यम
वतीस्मरन्ता । तुलसीचंदनादीनां न निर्माल्यता स्मृता । तेन प्रातःकाले वा न पतेन दोषः । अथ विहितानि । तत्र
सूर्यस्य भविष्यपुराणे । मालतीमल्लिका चैव दूर्वा काशोतिमुक्तकः । पाटला करवीराणि जपा तयंति
रेव च । चंपकोशोतकं कंदोषा बाणो बर्बरमल्लिका ॥ अशोककर्णिकारो च तथैव ब्रह्मटरस्तथा कः । शतपत्राणि
चान्यानि नकुलं च विशेषतः ॥ अगस्तिकिंशुकौ तद्वत्पत्राण्यर्भास्करस्य च ॥ विहितानीति शेषः ॥ अथ प
त्राणि बिल्वपत्रं शमीपत्रं भृंगराजस्य पत्रकं । तमालपत्रं च हरेः स घस्तुष्टिकरं रवेः । तुलसीकालतुलसीत
थारक्तं च चंदनं ॥ केतकीपत्रकुसुमं सद्देवतपनप्रियं । अथ शिवे । करवीरो वकश्चैव अर्क उन्मत्तकस्तथा ॥ पा
टला बृहती चैव तथा च गिरिकर्णिका । तथा काशस्य पुष्पाणि मंदार अपराजिता ॥ शमीपुष्पाणि चान्यानि
कुब्जकं शिणि नीतेथा अपामार्गस्तथा प द्मरानीपत्रेस तरोच कः । चंपको शीरतगरं तथा वै नागकेसरं पुन्ना
गकेकिरातेच द्रोणपुष्पं तथा मुनं । शिंशपोदुंबरश्चैव तपामठ्टी तथैव च । पुष्पाणि य तट्टस्य राम
तथा बिल्वं प्रियंगुन्नां कुंकुमस्य च पुष्पाणि तथा वैकंकतस्य च । नीलं च कुमुदं चैव तथा रक्तोत्पलानि ४०

च सुरभीणि च सर्वाणि स्थलजान्यौदकानि च । गंधानि दिव्यसौगंधीयेयेभक्त्यानिवेद्य परम शिवे नीमयूर शिवा । नीलोत्प
लसहस्रस्य यो मालां संप्रयच्छति । शिवाय विधिवद्भक्त्या तस्य पुण्यफलं शृणु । कल्पकोटिसहस्राणि कल्पको
टिशतानि च । वसेच्छिवपुरे श्रीमान् शिवतुल्यपराक्रमः । अर्ककरवीरधत्तूरादिपुष्पदानफलं न लिखितं
ग्रंथगौरवभयात् ॥ सामान्यफलं शिवलोकप्राप्तिः । अथ दुर्गायाः ॥ देवीपुराणे । स्वराशुकृत च स्वामिपुष्पा
ण्यायेसमासतः । ऋतुकालोद्भवैः पुष्पैर्मल्लिका जातिपुष्पकैः । सितरक्तैस्तथा पुष्पैः पद्मैश्चपांडुरैस्तथा । किं
शुकैस्तगरैश्चैव कर्णिकारैः सचंपकैः । वकुलैश्चैव मंदारैः कुंदपु रिटकैः । करवीरार्कपुष्पैश्च शिंशिपे धै॰ति॰
श्चापरा ॥ जिते ॥ सितरक्तैस्तथा पीतैः कृष्णैश्चैव चतुर्विधैः । धत्तूरकातिपुष्पैश्च वंधुका गस्तिसंभवैः । मदनैः ६
सिंधुवारैश्च सुरभिमरुवकैस्तथा । लताभिर्वल्लवृक्षस्य दवोकुंदैः सुशोभनैः । मंजरीभिः कुशानां च बिल्वप
त्रैः सुशोभनैः । रक्ताम्वितैस्तथा सर्वैर्जलजैः स्थलसंभवैः पत्रैः पुष्पैर्यथान्यायं सर्वौषधिमयैः शुभैः ॥ धान्या
नां सर्वपत्रैश्च पुष्पैश्चैव प्रपूजयेत् । बिल्वपत्रैः पूजनेराजसूयफलं । करवीरस्तु जाग्निष्टोमफलं । व
कुलस्तु जावाजपेयफलं । द्रोणस्तु राजसूयफलं । एवमन्यत्र ॥ अथ विघ्ने ॥ नरसिंहपुराणे । मल्लिका
मालती जातीकेतकाशोकचंपकैः । पुन्नागवकुलैः पद्मैः केरसलादिभिः । एतेरन्यैश्च कुसुमैः प्रश

नाग १

Indira Gandhi National Centre for the Arts

श्रा॰म॰

४२

स्तत्रजनेहरेः॥वामनपुराणे॥जातीशतात्सुमनाकुंदंचांबुपुरस्तथा॥बाणाश्चचंपकाशोकंकरवीरंचयूथिका॥पारिभद्रंपाट
लाचबकुलंगिरिशालिनी॥तिलकंजास्तुवनजंपीतकंतगरंतथा॥एतानिहिप्रशस्तानिकुसुमान्यच्युतार्चने॥सु
रभीणितथान्यानिवर्जयित्वातुकेतकीं॥केतकीधत्तुरमिति केचित्॥वन्हेकेतकीस्थपरे॥शस्ताख्याशोकइतिप्रसिद्धः॥
सुमनाःसुवर्णजातीःअंबुदःकर्णिकारःजसुवनंजपा॥गिरिशालिनीश्वेतकुटजं॥अथपत्राणि॥अप
मार्गस्यप्रथमंभृंगराजमतःपरं॥तस्माच्चखादिरंप्रोक्तंशमीपत्रंततःपरं॥दूर्वापत्रंतथाप्रोक्तंततोपिकुश
पत्रकं॥तस्माद्दमनकंप्रोक्तंततोबिल्वस्यपत्रकं॥बिल्वपत्राद्पिहरेस्तुलसीपत्रमुत्तमं॥एतेषांतुयथालाभं
पत्रैर्योर्चयेद्धरिं॥सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते॥नरसिंहपुराणे॥कृष्णमद्धेतिविप्रस्तातुल
सीपत्रमंजरी॥सुवर्णकोटिपुण्यानांपुराण्ये यच्छलतोधिकं॥तुलसीणिपरामंत्रः॥महाप्रसादजननीसर्वसौ
भाग्यवर्द्धनी॥आधिव्याधिहरानित्यंतुलसीत्वंनमोस्तुते॥द्रोणपुष्पंतथैकस्मिन्साधकोपनिवेदिते॥दशस्वर्णसु
वर्णनित्तत्फलंलभतेनरः॥अगस्तिकुसुमैर्देवंयोर्चयेज्जनार्दनं॥दर्शनात्तस्यदेवर्षेनरकान्नरकोनुपास्य
ति॥द्रोणपुष्पंखादिरंचशमीबिल्वंचवकंतथा॥वकंवकुलं॥नंद्यावर्त्तंकरवीरंतथाश्वेतंचकिंशुकं॥कुशपुष्पंत
मालंचचंपकाशोककेतकी॥त्रिसंध्यंमालतीपुष्पंत्रिसंध्यंश्वेतजातुधा॥कुंदवशातपुष्पंचमल्लिका हेम

४२

जातिपुष्पकं॥सर्वेस्वेसहस्रेभ्योधिकस्मादुत्तरोत्तरं॥जातीपुष्पसहस्रेणयःकृत्वामालांसुशोभनां॥विष्णवेदीयतेभक्त्यातत् वि ३
स्यपुण्यफलंशृणु॥कल्पकोटिसहस्राणिकल्पकोटिशतानिच॥वसेद्दिव्यपुरंश्रीमान्विष्णुतुल्यपराक्रमः॥म
जरीसहकारस्यकेशवोपरिनारद॥पंक्तितेमहात्मानेगोकोटिफलंभाग्ति॥पुरंधिपुष्पयोद्देयोदेकमथ्यथ
पंडितःतिलपात्रप्रदानस्यफलमाप्नोत्यसंशयं॥पुरंध्रिःसर्वदेशेपुगुणितिप्रसिद्धा॥इतिपुष्पाध्यायः॥अथस्व
जापतनानिअग्निपुराणे॥अस्वप्नोह्यस्वपल्पेस्थंडिलेप्रतिमासुच॥षट्स्वेतेषुहरेःसम्यक्अर्चनंमुनिःस्य नि ५
तात्स्कंदे॥कामात्सकथवाकुद्वःशालग्रामशिलार्चनात्॥भक्त्यावापदिवाभक्त्याकलौमुक्तिमवाप्नुयात्॥
वैवस्वतभयंनास्तितथाचकलिकालतः॥यःकथांकुरुतेविप्रोशालग्रामशिलाग्रतः॥शालग्रामशि
लायास्तुप्रतिष्ठानैवविद्यते॥महापूजांतुकृत्वादौपूजयेत्तांततोबुधइति॥शिवायतनंभारते॥स
शांतपत्रनेयस्तुअङ्गपामुनिपुंगवा॥लिंगेवास्थंडिलेवापिशंकरंविधिपूर्वकं॥पुगदर्पणविनिर्जितसमर
दलीकेप्रमोदतइति॥भविष्ये॥बाणलिंगानिस्वयंजंदृष्ट्वातानिभुवनत्रये॥नप्रतिष्ठानसंस्कारस्ते
षामावाहनंनत्विति॥हेमाद्रौ॥ब्राह्मणेभ्योवासुदेवस्तुनपेःसंकर्षणस्तक्षा॥प्रद्युम्नःपत्न्यतेवैश्यै

Indira Gandhi National Centre for the Arts

आ॰ म॰ रनिरुद्धस्तु शूद्रे इति। विष्णुधर्मोत्तरे ॥ पंचवर्णो वासुदेवः षड्भिः प्रद्युम्नकः स्मृतः ॥ संकर्षणः सप्तवर्णो निरुद्धस्
४२ त्वेकादशैः स्मृतः चत्वारो ब्राह्मणैः पूज्याः क्षत्रियैरन्यजातिभिः ॥ वैश्यैर्द्वौ देवसंपूज्यौ तथैकः शूद्रजातिभिरिति
... यत्तु स्मृत्यंतरे एकमूर्तिर्न पूज्यैव गृहिणा भक्तिमिच्छता ॥ अनेकमूर्तिसंपन्नः सर्वकामानवाप्नुयात् ॥
तत्काम्यपूजापरं। नैवर्णिकपरं वा अद्वैतैकविधानात्तायद्यपि शालग्रामाः समाः पूज्या विषमा न कदाच
न। समेषु द्वितयं नैव विषमेष्वेकमेव हीति। तत्र पाद्मस्त्वयं विप्रपरं। तत्राप्याद्यांश्चत्वारो ब्राह्मणैः पूज्याः ...
इत्यस्यैवार्थमनुवदति॥ तृतीयपादस्तु अनेकमूर्तिसंपन्न इत्यनेकताप्राप्तौ द्वयोर्निषेधकं। अंत्यपादस्तु
शूद्रपरः। यत्तु विष्णुधर्मोत्तरे। शालग्रामशिलां वापि चक्रांकितशिलां तथा॥ ब्राह्मणाः पूजयेन्नित्यं क्षत्रि
यादिर्न पूजयेत्॥ तत्स्त्रक्षत्रियादिरिदि ... त्विति मध्यपदलोपि बहुव्रीहिगर्भेणात शूद्रासंबिताम बहुव्री
हिणा शूद्रपरं। तथा चायमर्थः ब्राह्मणाद्युच्चारणाच्चैव शालग्रामशिलार्चना ... ब्राह्मणीगमनाच्चापि
शूद्रस्यात्र ... लतां ... परिस्पृश्य स्पर्शसहितपूजानिषेधार्थः ब्राह्मणस्यैव पूज्यो हं ... यच्चैरप्य एम
मुनिरपि। स्त्री शूद्रकरसंस्पर्शो वज्रस्पर्शाधिको ममेति लिंगोक्तेः। स्त्रीणामनुपनीतानां शूद्राणां च ४२

नराधिप। स्पर्शनेनाधिकारोस्ति विष्णोर्वा शंकरस्य चेति। शूद्रो वा [तु]पनीतो वा स्त्री वा पतितो वा केशवं वा शिवं
वापि स्पृष्ट्वा नरकमश्नुत इति च। तृतीया ... स्त्रीशूद्रयोः साक्षात्पूजानिषेधकमिति तु
युक्तं। अतएव पाद्मे। ब्राह्मणस्त्रैव वैश्यानां त्रयाणां मुनिसत्तम। अधिकारः स्मृतः सम्यक् शालग्रामशिलार्चने॥
स्त्री शूद्रपतितादीनां ... विकर्मिणां। नैवाधिकारो विद्येत यः शालग्रामशिलार्चने। दीक्षायुतो ...
ऽपि घपानविवर्जितः। कर्तव्यं ब्राह्मणाद्यैस्तु शालग्रामशिलार्चनमिति। तत्रैव द्वारकाशैलसंभूतं ... पिवेत
कलौ। पापानि तस्य नश्यंति शतजन्मार्जितान्यपि॥ ... सर्वास्तुष्यंति देवताः॥ प्रायश्चित्त
ह्निपापानां कलौ पादोदकं हरेरिति। शिलैव शैलं। स्वार्थे ... द्वारकाशिलातापपानविधिः सापि शालग्रामेण
सहैव ... तत्तापपानमात्रं प्रजायां तु मानाभावस्सपरे॥ अथ विष्णोर्गंधपुष्पादि। विष्णुध
र्मोत्तरे॥ कलौ ... विष्णोस्तुलसी काष्ठचंदनं। विष्णुप्रीतिकरं मर्त्या उत्तरं यान्ति ते ... मालती
पुष्पैर्न ... तत्र पो भवेत्॥ ... पतिताः कलिकं हरेः ... हरिर्भक्त्या कमलैरपि नैः
ति तैरिति॥ पाद्मे। कार्तिके केतकीपुष्पं ये नरत्रं हरेः कलौ दीपदानं चरेद्वर्षिता ... नवे कुलमिति अ
थ ... नैकश्यता॥ अग्नेयपुराणे॥ अत्रैनस्य प्रवक्ष्यामि विष्णोरभिमतं ... लामु नयं

श्रा.म.
४२
सर्वेषां निर्वाणमाप्नुयुः ॥ आनुष्टुभस्य सूक्तस्य त्रिष्टुबंतस्य देवता । पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥ प्रथ
मां विन्यसेद्वामे द्वितीयां दक्षिणे करे ॥ तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेत् ॥ पंचमीं वामजानौ च षष्ठीं वै द
क्षिणे न्यसेत् ॥ सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा ॥ नवमीं नाभिमध्ये तु दशमीं हृदये तथा ॥ एकादशीं
कंठमध्ये द्वादशीं वामबाहुके ॥ त्रयोदशीं दक्षिणे तु तथैवास्ये चतुर्दशीं ॥ अक्ष्णोः पंचदशीं चैव विन्यसे
न्मूर्ध्नि षोडशीं ॥ पश्चाद्देहे तथा देवे न्यासं कृत्वा यथाविधि ॥ न्यासेन तु भवेन्नित्यं स्वयमेव जनार्दनः ॥ एवं न्या
सविधिं कृत्वा पश्चात्पूजां समाचरेत् ॥ एवमावाहयेद्देवं आसनं तु द्वितीयया ॥ पाद्यं तृतीयया चैव चतुर्थ्या
र्घ्यं प्रदापयेत् ॥ पंचम्याचमनं दद्यात् षष्ठ्या स्नानं समाचरेत् ॥ सप्तम्या तु ततो वासोऽप्यष्टम्या चोपवीत
कं ॥ नवम्या चंदनं दद्यात् दशम्या पुष्पमेव च ॥ एकादश्या तथा धूपं द्वादश्या दीपमेव हि ॥ नैवेद्यं तु त्रयोदश्या न
मस्कारं चतुर्दशी ॥ प्रदक्षिणां पंचदशी विसर्जनं षोडशी [illegible] तथा ॥ सर्जने विसर्जने ॥ स्नाने वस्त्रे च
नैवेद्ये दद्यादाचमनं तथा ॥ हुत्वा षोडशभिर्मंत्रैः षोडशान्नस्य चाहुतीः ॥ पुनः षोडशभिर्मंत्रैर्दद्यात्पुष्पां
जलिं षोडश ॥ तच्च सर्वं जपेत्सूक्तं पौरुषं सूक्तमेव च ॥ षण्मासात् सिद्धिमाप्नोति लिंगमेवं समर्पयेत् इति ॥ प श्रा.म.
शुनाग वते उद्वासावाहने न स्तः स्थिरायामुद्वासे नास्थिरायां विकल्पः स्यात् स्थंडिले च भवेद्द्वयं ४३

यावत्सूर्यश्च चंद्रश्च यावत्तिष्ठंति देवताः २

पाषाणादिषु स्थंडिले शालग्रामे च नैव च आवाहनविसर्जने ॥ शालग्रामे हि भगवान्सुसंनिहितः सदा हरिः स आवाहनविस
र्जने निषिद्धे तत्र तत्स्थो विनिवेशनमंत्र तत्क्रिया । आवाहनं कृत्वा दद्यात्पूर्वं पुष्पांजलिं हरेः । तस्यैवोन्मुखता प्राप्ये
पार्श्वे चाह्वासनं कृत्वा । अत्ते चासनं दद्यात् आगसंपत्तिः सिद्धय इति । तत्रैवा प्रतिमापरस्य चारणात् निसंस्थानं च का
रयेत् ॥ कारयेत्सर्वदिवसे यथामलनिवारणमिति । वस्त्रमपि न प्रसह्य निर्मलेन न तेन मधुसमर्पणं पर्यावस्त्रम
सूत्राणां कुर्याद्वस्त्रपरं तु दिने दिने इति तत्र सागरोक्तेः ॥ अपरं पुष्पादि । तत्रैवापावत्स्व उच्यते सूर्यश्च यावत्तिष्ठ
ति देवताः । न निर्माल्यं भवेत्तावत्स्वरूपविस्मरणमिति । बौधायनः ॥ अथातो हरिहरः परित्वर्धाविधिं व्याख्या
स्यामः स्नात्वा शुचौ देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वा कृत पुष्पैर्यथालाभमर्चयेत् ॥ सहपुष्पोदकेन महा
देवमावाहयेत् ॥ ॐ भूः महादेवमावाहयामि ॐ भुवः महादेवमावाहयामि ॐ स्वः महादेवमावाहया
मि इत्यावाह्य आयातु भगवान्महादेव इत्यथ स्वागतेनाभिनंदति । स्वागतं अनु स्वागतं भगवेन महादेवायेति
तत्स्वासनं कैलासमास्तां भगवान्महादेव इत्यासनं कूर्चं ददाति भगवतोयं कूर्चो दर्भमयस्त्रिवृद्धरितः सुवर्णस्त
दुपस्थितिः ॥ अत्र स्थानानि कल्पयति ॥ अग्नेः स्थानं कल्पयामि दक्षिणतः स्कंदपकल्पयामि विनाय

Indira Gandhi National
Centre for the Arts

कायकल्पयामिपश्चिमतःस्थूलायकल्पयामुत्तरतः उमायैकल्पयामिनैर्ऋत्यांकल्पयामीतिकल्पयित्वाथसा
वित्र्यापात्रमभिमंत्र्यप्रक्षाल्यत्रिरपःपवित्रं मध्यआनीयसहपवित्रेणादर्शयेत्॥ ॐमित्यतमितिस्ना
नं ॐस्वस्तिरुद्रेणापाद्यंदद्यात्तेनार्घ्यंअथव्याहृतिभिर्निर्माल्यंयथोत्तरतश्चंडायनमइत्येनंस्ना
पयित्वाचाहिरण्यमयेभुवइतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिचतसृभिःपवमानःसुवर्जनइत्येते
नानुवाकेनस्नापयित्वाद्भिस्तर्पयतिभवंदेवंतर्पयामिशर्वंदेवं ईशानं पशुपतिंदेवं रुद्रंदेवं उग्रंदेवं भी
मंमहांतंदेवंतर्पयामीतितर्पयित्वाथेतानिवस्त्रयज्ञोपवीतान्याचमनीयान्युदकेनव्याहृतिभिर्दत्वाव्या
हृतिभिःप्रदक्षिणंउदकंपरिषिच्यनमस्तेरुद्रमन्यवइतिगंधंदद्यात्सहस्राणिसहस्रशइतिपुष्पंदद्यादी
शानंत्वाभुवनानामधिश्रियंइतिधूपंदद्यात्सावित्र्याधूपमुद्दीप्यस्वितिदीपंदेवस्यत्वासवि
तुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांभगवतेमहादेवायजुष्टंनिवेदयामीतिनैवेद्यंअथा
ष्टभिर्नामधेयैरष्टौपुष्पाणिदद्याद्भवायदेवायनमःशर्वायदेवायनमःईशानायपशुपतये रु राम
द्राय उग्राय भीमायदेवाय महतेदेवायनमोब्रह्मणेनमोविष्णवेनमःस्कंदायनमःप्रयातु ४५

देवाय २

नगवानीशःसर्वलोकनमस्कृतः॥ अतेनहविषात्स्तःपुनरागमनायच पुनःसंदर्शनायचेतिप्रतिमास्थ
नेषस्वगणावाहनक्षिसर्जनवर्जंसर्वंसमानंमहत्वस्यपनमित्याचकृतन्दलाइभगवान्ध्यायनइतिकौ
र्मे। नविद्यतेएधनानुराणंविद्यतेकर्मवैदिकं॥ तस्मात्नादिमध्यांतंनित्यमाराधयेद्धरिं। अथवारुद्रमी
शानंभगवंतंसनातनं॥ आराधयेन्महादेवंभावपूतोमहेश्वरं। मंत्रेणरुद्रगायत्र्याप्रणवेनाथवापुनः
रुद्रगायत्रीतत्पुरुषायविद्महेइत्या घा। ईशानेनाथवारुद्रैत्र्यंबकेनसमाहितःपुष्पैःपत्रैरथाद्भि
र्वाचंदनाद्यैर्महेश्वरं॥ तथोनमःशिवायेतिमंत्रेणानेनवायजेत्। नमस्कुर्यान्महादेवंऋतंसत्यमितीश्वरंनि
वेदयीतस्वात्मानंयोब्रह्मराणमितीश्वरं॥ प्रदक्षिणंद्विजःकुर्यात्पंचब्रह्माणिवाजपेत्। ध्यायीतदेवमीशानं

शिववाक्य व्योममध्यगतंशिवमितिस्कांदे अग्राह्यंशिवनिर्माल्यं पत्रंपुष्पंफलंजलं। शालग्रामस्यसंसर्गात्सर्वंया
तिपवित्रतामितिकौर्मेघोमाहात्म्येबालस्यादृत्वादेवतायैनं।भुक्तेसयातिनरकंसकोटिभिर्जायत इ
तिशिववाक्यंस्कांदे। विप्रस्यतुसदेवाहंमुखेवस्य ... मुखेरपि॥ गरहत्वबालिप्रदृष्ट्वाभिविप्राणा
मिवदर्शनात्।बालिष्य ज्ञातथान्यद्धंकर्माणियानित्यस्वीयानिकुरुतेप्रियेतस्याहमग्रीरह्यामिचद्र

Indira Gandhi National
Centre for the Arts

श्रा॰ म॰ ४५ खंडविभूषिते। तथा नमोंतेन शिवेनैव स्त्रीणां पूजाविधीयते। एवकारः प्रणवपरिसंख्यार्थः। तथा नृसिंहताप
नीये स्त्रीशूद्राणां प्रणवं यजुर्लक्ष्मीस्त्रीशूद्रायनेच्छति। भविष्ये वि। स्वाहाप्रणवसंयुक्तं शूद्रे मंत्रं ददद्द्विजः। शूद्रो न
रकमाप्नोति ब्राह्मणः। श्रद्धा नियात रुद्रयामले। न प्राचीमग्रतः शंभोर्नोदीचीं शक्तिसंस्थितां। न प्रतीचीं यतः पृष्ठ
मतोऽस्त्यस्य समाश्रयेत्। मूलकं शंभोः पूजार्थे प्राचीमवस्थितः पेनस माश्रयेत्तां पश्चचक्रं पूर्वोक्तं संहारकं चक्रं प्राच्या
मवस्थितोऽपि एकवक्त्रपक्षे तु सुतरां। शाक्तिदेवी। दक्षोदक्षिणां दूरं च वचनं स्यपोपलक्षितं दिविषयमेव। वस्मारणा श्र
श्रावणः पूजायां तदनुसारेणैवाय स्यपूजकं तः प्राच्यास्तुनायं विषय इबाधात्। लिंगपुराणे। विना भस्म
त्रिपुंड्रेण विना रुद्राक्षमालया। पूजितोपि महादेवो न तस्य स्यात्फलप्रदः। तस्मान्मृदापि कर्तव्यं ल
लाटे पि त्रिपुंड्रकं। संवत्सरप्रदीपे। त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोर्यतस्तु ते। अश्रुकणा विंदवस्ते तु रुद्रा
क्षाख्यभवनभुवि। स्कंदे। पंचवक्त्रं स्वयं रुद्रः कालाग्निर्नामनामतः। अगम्यागमनाच्चैव अभक्ष्य
स्य च भक्षणात्। मुच्यते सर्वपापेभ्यः पंचवक्त्रस्य धारणात्। ॐ नम इति प्रत्येकमष्टोत्तरशतं ज
प्त्वा शिरोभिः सा प्रकृत्याप्यधारणीयः विना मंत्रेण यो धत्ते रुद्राक्षं भुवि मानवः। स याति नरकं घोरं याव त्म
दिंद्राश्चतुर्दश इति तत्रैवोक्तेः अथ पार्थिवपूजा। नंदिपुराणे। आयुष्मान् बलवाञ्छ्रीमान् पुत्रवान् धन ४५

वान्सुखी। वरमिष्टं लभेल्लिंगं पार्थिवं यः समर्चयेत्। तस्मात्पार्थिवलिंगं ज्ञेयं सर्वार्थसाध
कं। भविष्ये। मृद्भस्मगोशकृत्पिंडैस्ताम्रकांस्यमयं तथा। कृत्वा लिंगं सकृत्पूज्य वसेत्कल्पायुतं दिवि
सज्वि नमरलिंगं स्फाटिकं सर्वकामदं नर्मदागिरिजं श्रेष्ठमन्यदपि ह्लिंगवत् कृत्वा पूजयविप्र दलस्य ते
वेहितेफले लिंगवत् लिंगाकारं तिष्ठितत्वे अशाखं परिमाणं न लिंगं कुत्र चित्स्मरः कुर्वीतांगुष्ठतो न्यूनं
नकदाचित्समाचरेत् अंगुष्ठेन तदर्द्धं तत्पर्वग्रथितः अंगुष्ठांगुलिमानं तु पत्रपत्रादि दृश्यते नत्र
तत्र हर हर सर्वग्रंथि निर्मितु पात्स्मरेत् इति छ रोगपरीक्षिणात् शिवधर्मे सहस्रमर्च्य लिंगं निर्गुणं सगुण ये५
इति रुद्रलोकमवाप्नोति भुक्त्वा भोगाननुक्रमात् तथा वालुकानि च लिंगानि पार्थिवानि च कारयेत्
सहस्रपूजनात्सोपि लभते वांछितं फलं देवीपुराणे महाहरणालं घरमतिष्ठाह्वानमेव च स्नपनं पूजा
नैवेद्यं विसर्जनमतः परं हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् पशुपतिः शिवश्चैव महादेव इति क्र
मात् अत्रानुष्ठाने ॐ हराय नमः इति मृदाहरणं ॐ महेश्वराय नमः इति संघट्टनं ॐ शूलपाणये हस्तप्रतिष्ठितो

Indira Gandhi National
Centre for the Arts

पुति २

अ॰ चा॰ ४६ मेवं तिष्ठा ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्वलांगं परशुमृगवराभीति
हस्तं प्रसन्नं पद्मासीनं समंतात्स्तुतममरगणै र्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्वबीजं निखिलभयह
रं पंचवक्त्रं त्रिनेत्रं इति ध्यात्वा पिनाकधृग्गिहागच्छेत्यावाह्य ॐ पशुपतये नमः इति स्नपनं एतस्मा
यं ॐ नमः शिवाय नमः इति एवमर्घ्यादिना पूजयेत् विसर्जनांतं भविष्यपुराणोक्तं सभा
यसितं ईशान्यादि दिक्षु वामावर्त्तेन पूजनं यथा ॐ शर्वाय क्षितिमूर्त्तये नमः ॐ भवा
य जलमूर्त्तये नमः ॐ रुद्राय अग्निमूर्त्तये नमः ॐ उग्राय वायुमूर्त्तये नमः भवायाकाशमूर्त्त
ये नमः ॐ पशुपतये यजमानमूर्त्तये नमः ॐ महादेवाय सोममूर्त्तये नमः ॐ ईशा
नाय सूर्यमूर्त्तये नमः मूर्त्तयोष्टौ शिवस्यैताः पूर्वादिक्रमयोगतः आग्नेय्यंताः प्रयो एन
ज्यास्त्वेघोलिंगे शिवं यजेत् ततः ॐ महादेव क्षमस्वेति संहारमुद्रया विसर्जयेदिति ४६
नंदिपुराणे ॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६

॥ॐ॥ गौ महिषाय वस्त्रपरिवलि पुष्प निवेदनं ॥ हयो नमः शिवायेति मंत्रः सर्वार्थसाधकः सर्वमंत्राधिकश्चाय
मोकारादिः षडक्षरः तन्मंत्रजापी तत्कर्मरतस्तद्गतमानसः । निष्कामः पुरुषो राजन् स रुद्रपदमश्नुते । पंचाक्षर
सुपक्रम्य भाविव्य ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा । महापातकसंयुक्तो मंत्रस्यास्य जपे यथा । अधि
कारी भवेत्सर्व इति वेदत्रयी शिवः इतिस्तथार्थः । पर्वीकृय थापदानुरोधात्पथाधिकारी भवेत्तथा त्रिवी
दिसर्थः । तथा सर्वेषामेव पात्राणां वरं पात्रं महेश्वरः । पतेन त्रायते यस्मात्तीव नरकार्णवात् । शिव
मुद्दिश्य पद्दत्तं सर्वकारणकारणं । तदनंतफलं दातु भवतीति किमद्भुतं । दत्वा नैवेद्यवस्त्रादीन् नानार्दीतक
दाचन । त्यक्तं शिवमुद्दिश्य तद्दानेन न तत्फलं । आदानेन हरो ॥ शिवधर्मे । तस्मात्सुष्मैः फलैः पत्रैस्तो
येरपि च यत्फलं ॥ तदनंत फलं ज्ञेयं भक्तिरेवात्र कारणं । तत्रैव । लिंगानुलेपनं कार्यं दिव्यगंधैः सुगंधि
भिः । वर्षकोटिशतं दिव्यं शिवलोके महीपते । शिवधर्मे । तस्मात्पुष्पप्रदानेन लिंगेषु प्रतिमासु वा अ
शीति वर्षकोटीनां दुर्गतिं न नरो व्रजेत् । स्कंदे । पुष्पाण्यपि च पत्राणि श्रीवृक्षस्य सदैव हि । प्रदत्वानी
तिशेषः ॥ भविष्ये । धत्तूरकैश्च यो लिंगं सकृत्संपूजयते नरः । सगोदानफलं प्राप्य शिवलोके महीपते
बिल्वपत्रैरखंडैश्च यो लिंगं पूजयेत्सकृत् । सर्वपापविनिर्मुक्तः शिवलोके महीपते । तथा सर्वकाम

Indira Gandhi National
Centre for the Arts

श्रा॰म॰ मं किल्विषरोगप्रस्य विनाशनं॥ बिल्वपत्रात्परं नास्ति येन तुष्यति शंकरः॥ तथा केशकीटादि विद्धानि निर्लेपपर्युषितानि चास्वप्ये
४७ पतितपुष्पाणि सर्जपुरहतान्यपि॥ तथा देवदारुसमं तेन सर्ज श्रीवासकुंदुरुं॥ श्रीफलं वा त्वसंमिश्रं दशधूपांतिं
पसंगातिः॥ सर्जः शालरसः॥ श्रीवासः सरलद्रवः॥ कुंदुरुः शैलेयमिति स्मार्त्तः॥ सल्लकी निर्यास इति दामोदरः॥ ए
ष्पः सोगंधिकं धूपं षट्सहस्रगुणोत्तरं॥ अगुरुं शतसाहस्रं द्विगुणं वा सितायुतं॥ गुग्गुलं घृतसंयुक्तं साक्षात्
त्र ह्यति शंकरः॥ तथा तैलेनापि हि यो दद्यात् दीपं भावेन मानवः॥ तेन दीपप्रदानेन शिवबद्धात्त्तस्तुवि॥ नैवेद्ये
रे॥ अथ भक्त्या शिवं यस्तु नैवेद्यमुपकल्पयेत्॥ आयघटे वात्मनः श्रेयस्त्वदीशाय प्रकल्पयेत्॥ भक्ष्यभोज्यं तु॥ शालितं
डुलप्रस्थं तु कुर्याद्यन्नं सुसंस्कृतं॥ शिवाय तं च रुद्रध्यायैश्चतुर्दश पोसमाहितः॥ शैवसर्वस्वे स्कांदे॥ एकमात्रफलं पक्वं यः
शंभोर्विनिवेदयेत्॥ वर्षाणामयुतं भोगः शिवलोके महीयते॥ एकं मोचाफलं पक्वं यः शिवाय निवेदयेत्॥ सर्व
९३ मष्टमहाभोगः शिवलोके महीयते॥ मोचा कदली॥ शिवपुराणे॥ नैवेद्यं घृतसंयुक्तं मधुपर्कं निवेदयेत्॥ अग्नि
ष्टोमस्य यत्तस्य फलमाप्नोति मानवः॥ परिपक्वसुसंस्थं घृताढ्यपसिक्तं सुसंस्कृतं॥ शिवाय मांसं दत्वा
तु यद्गुण्यस्फलमाप्नुयात्॥ अशेषफलदानेन यत्फलं परिकीर्तितं॥ तत्फलं प्राप्नुयात्सम्यक् सर्वमांसनि राम ४७

लिंगपूजायां गुणफलसंबंधः लवणोनच सौभाग्यं पार्थिवं सर्वकामिकं अनेकफलदं भूरि सैकतं यदि कीर्ति
नं ग्रामदं तिलपिष्टोत्थं तुषोत्थं मारणोत्सवं अंधोत्थमन्नदं मोक्षं गुडोत्थं शांतिवर्द्धनं गंधोत्थं गुणदं भूरि श
र्करोत्थं सुखप्रदं वंशांकुरोत्थं वंशार्थ गोमयं सर्वरोगहृत वैश्वर्यं स्थिसंभवं लिंगं सर्वशत्रुविनाशनं आ
सुरीलवणोत्थं च सर्वलोकवशंकरं स्तंभाय रजनीपिष्टसंभवं लिंगमुत्तमं तदुल्लेखं पिष्टस्य लिंगस्य
वैस्वतं प्रदं दधिदुग्धोद्भवं लिंगं कीर्तिलक्ष्मीसुखप्रदं धान्यदं धान्यजं लिंगं फलोत्थं फलवर्द्धनं दूर्वागुडूचीसं
भूतमपमृत्युनिवारणं रसोद्भवं लिंगमुच्चाटनकारं परं आगमोक्तनियोगं तु तान्तासम्यग्विचक्षणः व
लमात्रस्य कुर्वीत लिंगं तत्र फलाप्तये नासंविग्नप्रदं लिंगं स्फाटिकं सर्वकामिकं विद्यार्थी लिंगसाहस्रं कन्यार्थी
तु शतत्रयं पुत्रार्थी सार्द्धसाहस्रं कन्यार्थी शतपंचकं सुहृत्कामः सहस्रं तु वस्त्रार्थी शतमष्टकं उच्चाटनपरो वैरपो
त्कसहस्रकं मारणार्थी सप्तशतं मोक्षार्थी शतमष्टकं स्तंभनं तु तदर्धेन मरणं तु तदर्धकं निग्रहानुग्रहे सह
हस्रं तु समाचरेत् महाराजभये पंचसहस्रं सर्वकामदं एकं पापहरं प्रोक्तं द्विलिंगं कामसिद्धिदं त्रिलिंगे सर्वकामानां
मारणं परमाद्भुतं लिंगानामयुतं चापि महाराजभये चरेत् कारागृहविमुक्त्यर्थमनेनं कारयेद्बुधः डाकिन्यादि

Indira Gandhi National
Centre for the Arts

भयेप्राप्ते सहस्रं कारयेत्तदा सहस्राणां पंचशतं पुत्रकामेन कारयेत् कृत्वा निसंविधानेन सगुणां पुत्र
मानुयात् लक्षमेकं तु लिंगानां यः करोति नरो भुवि शिवरूपमवाप्नोति नात्र कार्या विचारणा इ
ति शिवागमे लिंगविधानं चमत्कारचिंतामणौ नार्मदं गृहे ग्रमजाम्रं शिश्वतुरंगुलतोधिकं न
वितस्त्यधिकं धान्यसंभवाश्रेयस्तुता पंचसूत्रलिंगमिष्टं तश्रेरवरे लिंगमस्तकविस्तारं पू
जाभोगसमं नयेत् नाहं तत्त्रिगुणं कुर्यान्नाहवम्मीरविस्तृतिः पूजांशाद्विगुणां कुर्यादुन्नतं पीठमु
न्नमं वृत्तं वा चतुरस्रं वा मध्ये कंवसमन्वितं द्विगुणं लिंगनाहाच्च केदनाहं समाचरेत् त्रिमेखलम
गं५ धश्चोर्ध्वसमं वा पट्टिमेखलं लिंगमस्तकविस्तारं षड्गंविभजेत्ततः मेखलामेकभागेन कुर्यात्खातं च तत्समं
लिंगदैर्घ्यसमं कुर्यात्प्रणालं पीठखातनः विस्तारं तत्समं मूलेतदर्द्धं चनदग्रतः जलमार्गः प्रकर्तव्यस्तत्समधे
त्रिभागतः कुर्यात्तीर्थं दीर्घं वा प्रणालं च शिवागमादिति पूजाशलाका आभोगउक्तनानाहः पृथुता अप
माशयः लिंगमस्तकव्यासो लिंगोच्छ्रायसमः व्यासत्रिगुणो नाहः तावानेव पीठव्यासः पीठं चवृत्तं चतुरस्रं
वा प्रणालिका च लिंगव्याससमूले विस्तृता अग्रे तदर्द्धा तद्द्विगुणा सार्द्धा वा दीर्घेति विंदरिकायां॥ ॥ शोधपत्रं ४८

देवी२

वेदनात् शिवधर्मे [illegible] लिंगवेदीभवेद्देवी
[illegible]
लिंगोसा हुम्नम्र ... तयोः संयुज्यनास्या तां वक्ष्यस्ति तो देवी पुराणे संध्यवजे ततोसमप्रणालं नेवुलघपेत्
एकी भूतमना रुद्रयः कुर्यात् त्रिः प्रदक्षिणां छिन्नस्तेन भवेद्दुष्टिष्ठितस्य पुनरुम्भवः भविष्ये जानुभ्यां चैव पाणि
भ्यां शिरसा च क्षितिं गतः कृत्वा प्रणामं देवेशे सर्वान्कामानवाप्नुयात् लिंगपुराणे गंधधूपनमस्कारैर्मुख
४६ वाद्येश्च सर्वशः यो मां समर्चयेन्नित्यं तत्र तदानुष्ठाम्यहं सदा महाभारते सर्वलक्षणहीनोपि युक्तो वा सर्व
पातकैः सर्वं तरति तत्पापं भावयन् शिवमात्मना राघवभट्टधृतं अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकं
क्षिप्तांगुलीरंगुलीभिः संयुज्य परिवर्तयेत् प्रोक्ता संहारमुद्रेयमपि तो तु प्रयास्त तोत्रयो त्मनीति शेष
स्कांदे निर्माल्यं यो हि मम्र शिरसा धारयिष्यति अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः नरके पच्यते
घोरे तिर्यग्योनौ च संभवेत् ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् तस्य पापं महच्छीघ्रं नाशमिष्यम
हाव्रते शुचिः स्नात्वा नोदिने सर्वः एवं वस्त्रप्रष्टव्या रुद्रस्य निर्माल्यं सर्वा सा आस्तुतं शुचिं इति कालिकापु
राणीयमप्यविविषयं अनुपनीतविषयं वेति स्मार्ताः वेदकृत्वरस्य परे शिवे अन्यत्र शिवनिर्माल्यं पत्र

Indira Gandhi National
Centre for the Arts

ग्रा॰ म॰ ४८ पुष्पफलं जलं शालग्रामशिलास्पर्शात्सर्वं याति पवित्रतां कोर्मे इति देवपूजा मात्स्ये तत्त्रोयदेच्छारमपि परज्ञेयं तत्तेन गु
हो न दृष्टं तेन गुरुमंत्रेन रैस्तत्राफलाक्रिया होन पुराणे॥ वस्त्राभरणमाल्यानि शयनान्यासनानि च प्रियाणि चात्म
नो यानि तानि देयानि वै गुरोरिति इति गुरुपूजा अथ वैश्वदेवविधिः नरसिंहपुराणे॥ पौरुषेण तु सूक्तेन ततो
विष्णुं समर्चयेत् वैश्वदेवं ततः कुर्याद् लिकर्म तथैव च ॥ शातातपः ॥ वैश्वदेवः प्रकर्त्तव्यः पंचसूना पनुत्तये इति
[illegible] मास्छलं ॥ पम॥ पंचसूना गृहस्थस्य वर्त्तंते हरहः सदा खंडनी पेषणी चुल्ली जलकुंभ अपस्करः इ
ति । खंड [illegible] लं खंडनं मुसलादि । अवस्कर उत्करः । उपस्कर इति पाठे शूर्पचालन्यादि गृहद्रवसिद्धः । अनग्निकस्त
यो विप्रः सोन्नव्याहृतिभिः स्वयं । हुत्वा शाकलमंत्रैस्तु शिष्टाभ्रं तु बलिं हरेत् । अनग्निको भार्याभावेन श्रौत
स्मार्ताग्निपरिग्रहाधिकाररहितः स्यात् कर्मप्रदीपे अग्न्यादिर्गौतमेनोक्तो होमः शाकल एव च अनाहिता
ग्नेरप्येष युक्तो बलिभिः सह । अग्न्यादिरग्निवाय्वादिदेवसंभारादि व्याहृतिकरणकः । अपिरेवकारार्थो
विद्वसुः । अन्नं व्याहृतिभिर्हुत्वा पूर्णयेदिति स्थितिः ततः प्रजापतिहविरिति प्रजापतये स्वाहेति हुत्वेत्यर्थः ॥ एतज्ज राम
प इति तुलसीकालीनमतुष्यपक्षतोनुवाद माचांनतु हेम्नोत्तरं तद्विधिः ज्योतिष्टोमे शंकिल हेम्नो गर्भ तारे
वक्तृतस्येनसौ वपज्जनमहो साधाः षट् शाकलमंत्राः कातीयानां प्रसिद्धाः । आश्वलायनः । अथसायंप्रा ४८

तः । सिद्धस्य हविष्यस्य [illegible] जुहुयादग्निहोत्रदेवताभ्यः सोमाय वनस्पतये अग्नीषोमा
भ्यां मिंद्राग्निभ्यां द्यावापृथिवीभ्यां धन्वंतरय इंद्राय विश्वेभ्यो देवेभ्यो ब्राह्मणे स्वाहा सायश
ब्दो रात्रिपरः प्रातः शब्दोहःपरः सिद्धस्य पक्कस्य अग्निहोत्रदेवताभ्य इति सायमग्निप्रा
तः सूर्यः प्रजापतिरुभयत्र सोमाय वनस्पतय इत्येकाहुतिः वनस्पतिशब्दस्य योगिकत्वे
न विशेष्यापेक्षत्वेनासमासस्य सन्निहितसोमपदान्वयात् यथा ताष्टपानीयतशब्दस्याव
ष्टपदान्वयः अग्निर्गृहपतिः सोमो वनस्पतिरित्यादौ वनस्पतेर्गुणत्वदर्शनाच्च विश्वेभ्यो
देवेभ्य इत्येकाहुतिः विश्वशब्दस्य सर्वनाम्नो बुद्धिस्थापेक्षत्वेन सन्निहितदेवशब्दान्वयात्
एवं दशाहुतयो भवंति इति सूत्रोनारायणस्याप्ययमेवाशयः इत्येष देवयज्ञः भूतयज्ञ
मासहस एव । अथ बलिहरणमेताभ्यश्च देवताभ्यो ऽद्भ्य ओषधिवनस्पतिभ्यो गृहाय गृहदे

Indira Gandhi National
Centre for the Arts

आ॰ म देवताभ्यो वायुदेवताभ्य इंद्रायेंद्रपुरुषेभ्यो यमाय यमपुरुषेभ्यो वरुणाय वरुणवरुण
४९ पुरुषेभ्यो सोमाय सोमपुरुषेभ्य इति प्रतिदिशं ब्रह्मणे ब्रह्मपुरुषेभ्यो ~~यमः यमपुरु~~
पुरुषेभ्यो बलिः पूर्वोक्त दशाहुति देवताकान् बलीन् प्राक् संस्थान् दत्वा किंचित्स्थले ~~ब्रह्म~~ अ
भ्यो बलिः पूर्वोक्त दशाहुति देवताकान् बलीन् प्राक्संस्थान् दत्वा तन्मध्ये
ऽग्न्यादिभ्यो बलिन् दत्वांतराले प्रागादिषु इंद्रादिभ्यस्तत्पुरुषेभ्यश्च दत्वातन्मध्ये
तु ब्रह्मणे तत्त्वदिक्षु ब्रह्मपुरुषादिभ्यो दद्यात् प्रथमं दिवाचारिभ्यो बल्युक्तेर्वैश्वदेवः प्रातरार
भ्य इति वृत्तौ इति भूतयज्ञः पितृमहायज्ञमाह स्वधा पितृभ्य इति प्राचीनावीती शेषं दक्षिण
निनयेत् शेषग्रहणादनेन तर्पयेत् परप्रयुक्तं च द्रव्यं लभ्यते दक्षिणादातु इति पितृयज्ञः इदमेव कर्म
त्रयं वैश्वदेवाख्यं कारिका गृहस्थो वैश्वदेवाख्यं कर्म प्रारभते दिवा तंत्रेनास्यत्र भगवद्वृत्तिका
रयचोयथा औपासनाग्निमन्यं वा समिध्याथ हविर्भुजं पर्युक्ष्य परिषिच्याग्निमलंकृत्य च पूर्ववत् ४९

हविष्यं पक्वमादद्यात् अधिश्रित्यानले च तत् प्राक्कोद्वास्य घृताभ्यक्तं हविः सव्ये निधाय च
हुत्वा हस्तेन सूर्याय इत्यादिभिर्दशभिस्ततः प्रजापति पदस्यात्ते वैश्वदेवं ननु स्मृतिः पर्युक्षणोक्ष
णाक्षनां कुर्याद्देवयज्ञायमीरितः एतेभुविबलिं दत्वा प्राक्संस्थान्ना निरंतरान् मुक्तांतरा
लं प्राक्संस्थानं ध्याइत्यादिभिर्हरेत् इहापि भवति स्वाहाकारान पितृयज्ञके अद्भ्यो हुता हुले
प्रत्यग्निंद्रायेति बलिं हरेत् पुरुगें द्राहुले रिंद्रपुरुषेभ्यो बलिं हरेत् ~~सोमायस्यमसादस्य तदुं~~
ततस्ततो बलिं यमाय ये तत्तराले स्य हरेद्दक्षिणतो बलिं याम्याक्रजे दुर्ग्याम्यं पुरुषेभ्यो बलिं
हरेत् प्राग्ब्रह्मणे बलिं हुत्वा वरुणायेति मंत्रतः तस्मादुदक्तु वरुणपुरुषेभ्यो बलिं हरेत् सोमा
येत्यंतरालस्य हरेदुत्तरतो बलिं सोम्याद्गुलरुद्रगुसोमपुरुषेभ्यो बलिं हरेत् यजंतस्वाहरेत्
यजंतस्वाहातैर्बलीन् मुक्तांतरालमिंद्रादि दिग्देवानां बलिं हरेत् इंद्रादि बलितः ~~प्राच्यां~~

Indira Gandhi National
Centre for the Arts

आ॰म॰
५०

स्यात्पौरुषाबलिः अन्तराले बलीन्हृत्वा शिष्टैर्मन्त्रैरतः परं रक्षोभ्य इति सर्वस्माद्बलिमुत्तरतो हरे
त् भूतयज्ञाय मुदितः प्राचीनावीत्यतः परं स्वधा पितृभ्य इत्युक्त्वा दक्षिणस्यां तु निर्वपेदिति
अयं च वैश्वदेवो नराकारः संपद्यते चक्राकारमप्याह शौनकः चक्राकारेण यो विप्र सदा भूतब
लीन्हरेत् सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् अथ गृहबलिः शौनकः देवयज्ञान्नशे
षात्तु गृहद्वारादिषु क्षिपेत् चंडालपतितमहाय: कीलरुद्राय प्राच्यादि प्रतिदिशं सनवग्रहायेंद्रा
यबलभद्राय यमविष्णुभ्यां स्कंदवरुणाभ्यां सोमसूर्याभ्यामश्विभ्यां वसुभ्यो नक्षत्रेभ्योथ मध्ये
वास्तोष्पतये ब्रह्मणे प्रागादिभित्तिमूलेषु सिद्ध्यै ऋद्ध्यै श्रियै कीर्त्यै वरुणायादृ थानेश्विभ्यां दृषदु
पलयोर्द्यावापृथिवीभ्यां मुद्गलखलमुसलयो रथनिष्क्रम्य भूमावप आसिच्य श्वचांडालभूपति
त भूतवायसेभ्योन्नं भूमौ विकिरेद्ध भूताः श्ववरं तिदिवानक्तं बलिमिच्छंतो वितुदस्य प्रेष्याः ते

एम
५०

भ्यो बलिं पुष्टिकामो ददामि मयि पुष्टिं पुष्टिपतिर्ददात्विति रात्रौ चेन्नक्तं बलिमिति ब्रूयादथ
प्रक्षालितपाणिपाद आचम्य शांता पृथिवी शिवमंतरिक्षं इति जपित्वान्यानि स्वस्त्ययनानि
ततो मनुष्ययज्ञशेषं भुंजीतेति इति वैश्वदेवविधिः अथ मनुष्ययज्ञः मनुः अतिथिभ्योन्न
दानं तु नृयज्ञः स च पंचम इति मार्कंडेयपुराणे ततः प्राज्ञः कुर्याद्द्वारावलोकनं मुहूर्तस्याष्टमभा
गमुद्वीक्ष्यो ह्यतिथिर्भवेत् नमित्रमतिथिं कुर्यान्नैकग्रामनिवासिनं अज्ञातकुलनामानं तत्का
लसमुपस्थितं बुभुक्षुमागतं श्रांतं याचमानमकिंचनं ब्राह्मणं प्राहुरतिथिं संपूज्यः शक्तितो बुधैः
इति कौर्मे हंतकारमथान्नं वा भिक्षां वा शक्तितो द्विजः दद्यादतिथये नित्यं बुध्येत परमेश्वर
मिति अतिथिपरमेश्वरभावये दित्यर्थः मनुः ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयं अग्रं च
तुर्गुणीकृत्य हंतकारो विधीयत इति अथ पाराशरः दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणां

Indira Gandhi National
Centre for the Arts

आ॰ प्र॰ इदुद्धयाचततोदद्याद्भिक्षवेसत्यवारितं व्यासः पंचयज्ञांस्तुयोमोहान्नकरोतिगृहाश्रमी तस्यना
५२ मंचनपरोलोकभवतिधर्मतः इतिमाधवीयेपुराणे यत्फलंसोमयागेनप्राप्नोतिधनवान्द्विजः
सम्यक्पंचमहायज्ञैर्दरिद्रस्तदवाप्नुयादिति अथकात्यायनीयावैश्वदेवानुष्ठानप्रयोगः पंचम
हायज्ञनिमित्तं मातृपूजापूर्वकमाभ्युदयिकंश्राद्धंकृत्वावैश्वदेवार्थपाकंविधायर्थपाकंविधा
यसमुद्धृत्याभिघार्यसमुद्धृत्याभिघार्यपश्चादग्नेःप्राङ्मुखोपविश्यदक्षिणंजान्वाच्यमणिको
दकेनाग्निपर्युक्ष्योदनमादायब्राह्मणेस्वाहेदंब्रह्मणे प्रजापतयेस्वाहा इदंप्रजापतये गृह्याभ्य
स्वाहाइदंगृह्याभ्यः कश्यपायस्वाहाइदंकश्यपाय अनुमतयेस्वाहाइदमनुमतये इतिपंचा
हुतीर्हुत्वा मणिकसमीपेहुतशेषेणान्नेन पर्जन्यायनमइतिपर्जन्याय अद्भ्योनमइतिइद
मद्भ्यः पृथिव्यैनमइदंपृथिव्यै इतिप्राक्संस्थमुदक्संस्थंवा बलिंदत्वादक्षिणोत्तरयोर्द्वारशाखयो ५२

बलिंदत्वादक्षिणोत्तरयोर्द्वारशाखयोर्यथाक्रमंधात्रेनमः इदंधात्रे विधात्रेनमः इदंविधा
त्रइतिबलिंदत्वाप्रागादिक्रमेणइतिवायवेनमः इदंवायवेइतिप्रतिदिशं बलिचतुष्ट
यंदत्वाप्राच्येदिशेनमः इदंप्राच्येदिशे दक्षिणायैदिशेनमः इदंदक्षिणायैदिशे प्रती
च्येदिशेनमः इदंप्रतीच्यै उदीच्येदिशेनमः इदमुदीच्यै इतिदिग्भ्यश्चबलिंदत्वा तदंतराले
ब्रह्मणेनमः इदंब्रह्मणे अंतरिक्षायनमः इदमंतरिक्षाय सूर्यायनमः इदंसूर्याय इतिबलि
त्रयंदत्वाउत्तरतोविश्वेभ्योदेवेभ्योनमः इदंविश्वेभ्योदेवेभ्यः विश्वेभ्योभूतेभ्योनमः इदंवि
श्वेभ्योभूतेभ्यः इतिबलिंदत्वातयोरप्युत्तरतः उषसेनमः इदमुषसे भूतानांपतयेनमः इदं
भूतानांपतयेइतिबलिद्वयंदत्वा ब्रह्मादिबलीनांदक्षिणतः प्राचीनावीतीदक्षिणामुखः
पितृभ्यः स्वधानमइतिमंत्रेण पात्रावशिष्टान्नेन एकबलिंदत्वापात्रींप्रक्षाल्ययक्ष्मैतत्ते

Indira Gandhi National
Centre for the Arts

आ॰म॰ ५२ नत्ते निर्णेजनं इति निर्णेजनजलं वायव्यां दिशि त्यजति येद्यक्ष्मण इत्यस्मा ऐंद्रव
रुणवायव्याः सौम्या वै नैरृतास्तथा वायसाः प्रतिगृह्णंतु भूमौ पिंडं मयार्पितं इदं वायस
भ्यः द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ ताभ्यां पिंडं प्रदास्यामि स्यातामेताव
हिंसकौ इदं श्वभ्यः देवा मनुष्याः पशवो वयांसि सिद्धाश्च यक्षोरगदैत्यसंघाः प्रेताः
पिशाचास्तरवः समस्ता ये चान्नमिच्छंति मयाद्य दत्तं इदं देवादिभ्यः पिपीलिका कीट
पतंगिकाद्याः बुभुक्षिताः कर्मनिबंधबद्धाः तृप्त्यर्थमन्नं हि मया प्रदत्तं तेषामिदं तेसु
खिता भवंतु इदं पिपीलिकादिभ्यः इति काकादिबलीन् बहिर्दत्वा पादौ प्रक्षाल्याचान
म्यातिथिं प्राप्तौ पादप्रक्षालनपूर्वकं गंधमाल्यादिभिरभ्यर्च्यान्नं परिवेष्य हंततोन्नाभि
दं मनुष्यायेति संकल्प्य दद्यात् इति कात्यायनीयो वैश्वदेवः इति पंचयज्ञाः अथ भोज ाम ५२

नन्यासः पंचार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः हस्तौ पादौ तथैवास्यमेषु पंचार्द्रता मता इति
श्रमाधिके आर्द्रपादस्तु भुंजीयात्प्राङ्मुखश्चासने शुचिः पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन
वा पुनरिति बौधायनः उपलिप्ते समे स्थाने शुचौ श्लक्ष्णसमन्विते चतुरस्रं त्रिकोणं च वर्तु
लं चार्धचंद्रिकं कर्तव्यमनुपूर्वेण ब्राह्मणादिषु मंडलं पैठीनसिः सौवर्णराजते ताम्रे पद्मपत्रे प
लाशयोः भाजने भोजनं कुर्यात् त्रिरात्रफलमश्नुते एक एव तु यो भुंक्ते विमले कांस्यभाजने
चत्वारि तस्य वर्धंते आयुः प्रज्ञा यशो बलमिति पद्मपलाशपूर्वग्रहणं गृहस्थभिन्नपरं तथापा
त्रं भुंजीत भिन्नकांस्यमलाविले पलाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेत् ब्रह्मचारी यतीनां तु चां
द्रायणफलं लभेत् एष मनुष्यासांते रिरतिमदनाशयः पलाशावल्लीपलाशः इति स्मृत्यर्थ
सारे कांस्यपात्रं गृहीमात्रपरं तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं यतिश्च ब्रह्मचारी च विधवा

आ॰म
५३

चविधृर्जयेत् इति प्रचेतसउक्तेः पात्रप्राणाहुतिग्रहणोत्तरं यत्रादौ संस्थाप्य न्यस्तपात्रस्तु भुं
जीत पञ्चग्रासान् महामुने शेषमुद्धृत्य भोक्तव्यं पितृर्थं निर्वाधरे इति व्यासोक्तेः न्यस्तपात्र
भूमिन्यस्तपात्रः उद्धृत्य यत्रादौ संस्थाप्य पित्रर्थं श्राद्धभूमितानो धरेत् इत्यर्थ इति मदनादयः
तथा च ब्रह्मपुराणे पित्र्ये कर्मणि भुंजानो भूमौ पात्रं न चालयेत् इति तत्रैव अन्नं दृष्ट्वा प्रणम्यादौ
प्रांजलिः कथयेत्ततः अस्माकं नित्यमस्त्वेतमिति भक्त्याथ वंदयेत् गोभिलः अथातः प्राणा
हुतिकल्पः व्याहृतिभिर्गायत्र्याभिमंत्र्य ऋतं त्वा सत्येन परिषिंचामीति सायं सत्यं त्वर्तेन परिषिं
चामि प्रातरित्यादि तदनंतरं कृत्यमुक्तं भविष्यपुराणे भोजनात् किंचिदन्नाग्रं धर्मराजाय वै बलीं
दत्वाथ चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरेत् यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनां प्रेतानां प्रीतये
क्षिप्तमिदमस्तु यथासुखमिति तदनंतरं कृत्यमाह याज्ञवल्क्यः आपोशानेनोपरिष्टादधस्तादश्न
तातथः अनग्नममृतं चैव कार्यमन्नं द्विजन्मना इति कामी अमृतापस्तरणमसीत्यापोशनं क्रियाचरे ५३

इति शौनकः स्वाहांताः प्रणवाद्याश्च नाम्ना मंत्रास्तु वायवः तर्जनीमध्यमांगुष्ठलग्नप्राणा
हुतीर्भवेत् जिह्वयैव ग्रसेदन्नं दशनैर्न स्पृशेदिति जिह्वाग्रसनं च विशेष उक्तः अश्वमेधिके
यथा रसं न जानाति जिह्वा प्राणाहुतेर्नृप तथा समाहुतिः कुर्यात् प्राणाहुतिमतंद्रितः इति
अश्नीयात्तन्मना भुक्त्वा भुंजीत मधुरं रसं लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः
प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनः अंते पुनर्द्रवाशी तु बलारोग्यैर्न मुंचति अपरार्कः
अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः द्वात्रिंशत्तु गृहस्थस्य ह्यमितं ब्रह्मचारिणः इधमनुः
पीत्वापोशानमश्नीयात्पात्रे दत्तमगर्हितं भार्याभृतकदासेभ्यः उच्छिष्टं शेषयेत्ततः इति भोजनं तु
न निःशेषं कुर्यात् प्राज्ञः कथंचन अन्यत्र दधिसक्त्वाज्यपललक्षीरमध्वपः मनुः सायंप्रातर्द्विजा
तीनामशनं श्रुतिचोदितं नांतरा भोजनं कुर्यादग्निहोत्रसमो विधिः इति अत्र पूर्वाषाढीकालद्वय
विशिष्टभोजनक्रियाया एव नियमविधेः बाधुशातु निराशस्त्रीणां नास्मिन्नभ्यासो विरोध इति धर्मत्

Indira Gandhi National
Centre for the Arts

आ॰म॰ अतः सत्याबुभुक्षायां सति चान्ने भोजनमकुर्वन् प्रत्यवैतीति विज्ञानेश्वरः सायंप्रातरेवेति कालां

५८ तरपरिसंख्येति हालायुधः इयं च तद्‌पपत्तिः नयत्रिदोषाकालांतरस्य विध्यप्राप्तत्वेन शास्त्र

प्राप्तरूपदोषाभावात् पंचपंचनखाभक्ष्याः इत्यत्रेव शशादिभिन्नश्वादिपंचनखभक्षणस्यरा

ग ग प्राप्तत्वेन तद्बाधेपि दोषभावः स्वार्थहानिपरार्थकल्पनादोषद्वयवतीलक्षणानुनाचरेत्याद्येक

वाक्यतानुरोधेनागीकुर्या साधन्जातपुत्रः कृष्णकेशोग्निमादधीतेत्यत्र वयोविशेषस्य

अर्थमतवेदिनोत्यत्र च संधिदेशस्य लक्षणावाक्यभिदोभयात् तत्र तत्र सतेः सायंप्रातर्भु

जीतैवेति नियमविधौ हि मध्ये पि भोजनस्य प्राप्तत्वेन तन्निबोधनार्थं नांतरेत्यादि एथग

वाक्यस्यादिति अहस्तु बुवेनांतरेत्यादि कमेव विधिप्रत्यय युक्तत्वात् अंतरालकालनिषेधिकं

पूर्वार्धोर्थवादोर्थे पादश्च तद्‌वत्वं च सायंप्रातः शाढ्यावेतरारात्रायस्य पुरोडाशाविति इयं च राम

सायंप्रातःपादयोरात्रिमध्याह्नलक्षणापि युक्ता उपास्य पश्चात्संध्यां हुत्वाग्निस्तान् पास्य च ५४

।श्रीमा

धर्मेपरिवृतो भुक्त्वा नातितृप्तो पसंविशेत् मध्य दिनो मनुष्याणां मध्यंदिने मनुष्या अशन

मभ्यवहरंति इत्यादिवाक्य प्राप्तानुवादत्वात् एवमितद्वयस्तु विधौ लक्षणाति क्लिष्टेति दि

क् भोजने पंचग्रासपर्यंतं मौन नियमस्तत्र नियमः पंचग्रासान्महामौनं प्राणाद्याप्यायनमहद्

इतिरत्थमनूक्तेः पुराणस्नास्यतो वरुणः शांतिं जुह्वताग्निः श्रियं हरेत् भुंजतो मृत्युराधुष्यंतस्मान्

मौनं त्रिषु स्मृतं अत्र विशेषः पृथ्वीचंद्रोदये स्मृतिरत्नावल्यां यवीयसां नृपवितायश्च भुक्त्वाश्राधि

मौनं त्रिषु स्मृतं अत्र विशेषः पृथ्वीचंद्रोदये स्मृतिरत्नावल्यां यवीयसान्नृस्वितायश्च भुक्त्वाश्राधि

कभोजने प्राणाग्निहोत्रादन्यत्र नासौ मौनं समाचरेदिति मौनी वाप्यथवा मौनी प्रहृष्टः संयतेंद्रि

यः भुंजीत विधिवद्विप्रो न चोच्छिष्टानि वापयेदिति नप्रकीरेदित्यर्थः पैठीनसिः लवणव्यंजनं चैव घृ

तं तैलं तथैव च लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत् सएव दर्व्यादियद्दत्तान्नं तु समस्तं व्यंज

नानि तु तथोदके यच्च पक्वान्नं यो दर्व्या दातुमिच्छति सपूर्णाहां सुरापश्च सस्तेनो गुरुतल्पगइति

शातातपः हस्तदत्तानि चान्नानि प्रत्यक्षलवणं तथा मृत्तिकाभक्षणं चैव गोमांसाशनवत्स्मृतम्

Indira Gandhi National Centre for the Arts

आ॰ म॰ ५५ अश्वमेधिके उदक्याया मपि चाण्डालं श्वानं कुक्कुटमेव च भुंजानो नैव पश्येत्तु तदन्नं तु परित्यजेत् के
शकीटावपन्नं च मुखमारुतावीजितं अन्नं तद्राक्षसं विद्यात् तस्मात्तत्परिवर्जयेत् शातातपः अ
ग्र्यासनोपविष्टश्च यो भुंक्ते प्रथमं द्विजः बहूनां पश्यतां सोऽज्ञः पंक्त्या हरति किल्बिषं गोभिलः एकपंक्त्या
पविष्टानां विप्राणां सहभोजने यद्येकोऽपि त्यजेत्पात्रं नाश्नीयुरितरेऽपि तु मोहात्तु भुंक्ते यस्तत्र तस्य सांत
पनं चरेत् भुंजानेषु तु विप्रेषु यस्तु पात्रं परित्यजेत् भोजने विघ्नकर्तासौ ब्रह्महापि तथोच्यत इति इदं च
गुरुभिन्ने आचान्ते उत्थिते वा बोध्यं तदाहोशना अगमिराचमनोत्थानं चैति पङ्क्तिस्थानां भोजनं निषेध
कृत्प्रयोजकइति शेषः अयं च निषेधो युगान्तरपरः उच्छिष्टस्यापि विसर्जनमिति कलौ निषेधपुणा
ठादिति केचित् तन्न एकस्मिन्नुत्थितेऽपीतरपात्रस्थान्नस्योच्छिष्टत्वाभावेन तथा नास्ति इत्युप
ठादिति केचित् तन्न एकस्मिन्नुत्थितेऽपीतरपात्रस्थान्नस्योच्छिष्टत्वाभावेन तत्थनाप्रसक्तेः वस्तुत
स्तु उच्छिष्टस्यापवर्जनमितिपाठः तदर्थस्तु अपवर्जनं दानं तत्तु ब्राह्मणायोच्छिष्टं प्रयच्छेदिति
मधुपर्कप्रसक्तं कलौ निषिध्यते निरणाद्ये मात्सरण्यैः कलिवर्ज्ये बृहस्पतिः नस्पृशेद्वामह रा॰ म॰ ५५

स्तेन भुंजानोऽन्नं कदाचन न पादेन शिरोवस्त्रेण पदा भाजनं स्पृशेदिति आदित्यपुराणे
नोच्छिष्टं ग्राहयेदन्यं जग्ध्वा शिष्टं न संत्यजेत् शूद्रभुक्तावशिष्टं तु नाद्याद्द्वादशत्थितावपीति ब्रह्म
पुराणे यस्तु पाणितले भुंक्ते यश्च फूत्कारसंयुतं प्रसृताङ्गुलिभिर्यश्च तस्य गोमांसवच्च तत् नजी
र्णभोजनं कुर्यान्न कुर्याद्भाति बुभुक्षितः नार्द्रवासा नार्द्रशिरा देवालयगतोऽथवा न प्रसारितपादस्तु पा
दरोपितपाणिमान् न चैव शिरसि श्वापिनो संगकृतभाजनः ग्रासशेषं न चाश्नीयात् पीतशेषं पि
बेन्न च शाकमूलफलेक्षूणां दन्तच्छेदैर्न भक्षयेत् बहूनां भुंजतां मध्ये नाश्नीयात्त्वरान्वितः वृथा न वि
किरेदन्नं नोच्छिष्टस्य क्वचिद्व्रजेत् इत्थं मनुः न पिबेन्न च भुंजीत द्विजः सव्येन पाणिना नैकहस्तेन च जलं शूद्रेणावर्जितं पिबेत् पिबतो यस्पतेत्तोयं भाजने मुखनिस्सृतं अभोज्यं तद्भवेदन्नं भो
क्ता भुंजीत किल्बिषं पीतावशेषं तोयं ब्राह्मणो न पुनः पिबेत् पिबेद्यदि हितं तोयं द्विजश्चान्द्रायणं
चरेदिति कौर्मे नार्धरात्रे न मध्याह्ने नाजीर्णे नार्धवस्त्रधृक् न भिन्नभाजने चैव न भूम्यां न च पाणि

Indira Gandhi National
Centre for the Arts

आ॰म॰ पु. नोद्धृतशेषं तमारभ्यान्नमूर्धानस्पृशन्नपि न भुंजीतेत्यर्थः नब्राह्मणं कीर्तयन्वापि न नि:
५८ शेषं न भार्यया नागारे न च वाकाशे नान्तरे वाऽऽलयादिष्वपि भार्यया सह या गेहे तृतीया शातातपः
उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः सुरापानेन तत्तुल्यं मनुराह प्रजापतिः अत्रिः तोयं पा
णिनखस्पृष्टं ब्राह्मणो न पिबेत्क्वचित् सुरापानेन तत्तुल्यमित्येवं मनुरब्रवीत् याज्ञवल्क्यः संधि
न्यनिर्दशावत्सागोपयः परिवर्जयेत् औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकमिति औष्ट्रे
मिलिते विकारमात्रे तद्धितः तेनाष्टसंबंधि मासादपि बर्ज्यं गौतमः गोश्च क्षीरमनिर्दशायाः
सूतके ज्यामहिष्याश्च नित्यमाविकमपेयमौष्ट्रमैकशफं स्यंदनीयं मसू संधनीनां विवत्सायाश्चे
ति अत्र विवत्सायागोरेव वर्ज्यं न महिष्यादेरपि गोत्वर्समना यिमयो विशेषस्यैव वत्सपदेऽरा
ति अत्र विवत्सायागोरेव वर्ज्यं नमहिष्यादेरपि गोलरमनायिमयो विशेषस्येव वत्सपदरा
कयत्वेन महिष्या अपत्येतदप्रसक्तेः एतेन विवत्सागवादिरिति हरदत्तीयमाहिपरपरास्तस्य ५८

प्रसूतवत्सानां यमसूत्रमननजननी संधिनीसगर्भा सायंप्रातर्वा तिक्रम्य यादुग्धे सायो जिता
न्यवत्सा वा अत्यतब्वा स्यानेन विवत्सापदं पुनरुक्तमिति केचित् तत्र तदर्थयोः परस्परव्यभिचाराद्
विज्ञानेश्वरा व्यवमेवाभिप्रेतिश्च्छाके गौतमः कहम्के भ्रमणग्रावचक्रपेषणयंत्र कात्यायनः
विज्ञानेश्वराप्यवमेवाभिप्रेतिश्लोकः गौतमः कदम्बभ्रमणग्रावचक्रपेषणयंत्रे कात्यायनः
चंडालपतितोदक्या वाक्यं श्रुत्वा द्विजोत्तमः भुंजीत ग्रासमात्रं तु दिनमेकमभोजनं बृहस्प
तिः अप्यकपत्त्यानाश्नीयाद्ब्राह्मणैः स्वजनैरपि को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेदिति
एकपंक्त्युपविष्टानां दुष्कृतं यद्दुरात्मनां सर्वेषां तत्समं तावद्यावत्पंक्तिर्न भिद्यते अग्निना भस्मनाचैव
स्तंभेन सलिलेन च द्वारेण च च मार्गेण पंक्तिभेदो बुधैः स्मृतः पाराशरः यावच्छिन्नशिरा भुंक्ते यावभुक्ते
दक्षिणामुखः वामपादे करं स्थित्वा न हि रक्षांसि भुंजत इति वामपादे करस्य स्थित्यर्थः स्थित्वा पावि
त्यमनुः आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः इति
दक्षिणामुखनिषेधस्तु नित्यभोजनपरः अथ भोजनांतरांगानि देवलः भुक्त्वा द्विजः समाचम्य

सर्वस्मात् किंचिदाचमनं । उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्बलीति तत्र मंत्र रौरवे पुण्यनिलये
पद्मार्बुद निवासिनां उच्छिष्टोदकमिच्छतां अक्षय्यमुपतिष्ठतामिति व्यासः ततस्तस्य सन्नमतापि
धानमसीत्यर्थं प्राश्य तस्माद्देशानुमनो गपस्पृश्य विधिवदाचमेदिति श्लोकगौतमः गडूषसस्या
थसमयेत्तर्जन्यावक्रवालनं कुर्वीत यदि मूढात्मा रौरवे नरके पतेदिति तथा थालास्मिन्नाचमनं कुर्वीत
यत्र भांडस्थभुक्तवान् यद्यासित्वतिनाचान्तो भुक्तवानासनात्ततः स्नानं सद्यः प्रकुर्वीत सोऽन्यथाप्रय
तो भवेत् व्यासः हस्तप्रक्षाल्य गंडूषं यः पिबेद् विचक्षणः स देवांश्च पितॄंश्चैव ह्यात्मानं चैव घातयेत्
कोर्मे आचांतः पुनराचामेदयं गौरिति मांत्रवः द्रुपदा वा त्रिरावृत्य सर्वपापप्रणाशिनी प्राणानां
ग्रंथिरसीत्यालभेद्धृदयं ततः आचम्याङ्गुष्ठमात्रोयं पादाङ्गुष्ठे तु दक्षिणे निःश्रावयेद्धस्तजलमूर्ध्व
हस्तः समाहितः हुतानुमंत्रणं कुर्याच्छ्रद्धयामिति मंत्रतः अक्षाक्षरेण स्वात्मानं योजयेद्ब्रह्मणे
ति हि सर्वेषामेव यागानामात्मयागः परस्मृतः यो नेन विधिना कुर्यात्स याति ब्रह्मणः पदमिति ॥ ५७

विष्णुपुराणे विष्णुस्तं तथैवान्नं परिणामश्च वै तथा सत्येन तेन वै भुक्तं जीर्यत्वन्नमिदं तथा इत्युक्त्वा
र्थस्वहस्तेन परिमृज्यात्तथोदरं अनायासप्रदायीनि कुर्यात्कर्मण्यतन्द्रितः आचान्तोऽप्यशुचिस्ता
वद्यावत्पात्रमनुद्धृतं उद्धृतेऽप्यशुचिस्तावद्यावन्नोन्मृज्यते मही भूमावपि हि लिप्तायां तावत्स्या
दशुचिः पुमान् आसनादुत्थितात्तस्माद्यावन्न स्पृशते महीमिति मार्कंडेयः भूयो व्याचम्य कर्तव्यं
तस्मात्तांबूलभक्षणं इति वसिष्ठः दत्तिस्सपूगं च सपत्रं च चूर्णेन च समन्वितं अदत्त्वा द्विजदेवेभ्यस्तां
बूलं वर्जयेद्बुधः एकपूगं सुखारोग्यं द्विपूगं निष्फलं भवेत् अतिशुत्रिपूगं स्याधिकेनैव दुष्यति पू
र्णमूलं भवेद्व्याधिः पूर्णाग्रे पापसंभवः चूर्णपूर्णं क्षिपेदायुः शिरा बुद्धिनिवासिनी तस्मादग्रं
च मूलं च शिरां चैव विशेषतः चूर्णपूर्णं वर्जयित्वा तांबूलं खादयेद्बुध इति अथ भोजनोत्तरक
र्त्यं दक्षः इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् अष्टमे लोकयात्रा तु बहिःसंध्या ततः पुनः
यमः एवं रात्रमयात्मवं घटिकैकाद्यदा भवेत् सायंसंध्यामुपास्याथ कुर्याद्धोमं च पूर्ववत् दी

कालः संग्रहे रवेरस्तसमारभ्य यावत्सूर्योदयो भवेत् यस्य तिष्ठद्गृहे दीपस्तस्य नास्ति दरिद्रता

आ०म कालःसंग्रहे रवेरस्तसमारभ्य यावत्सूर्योदयो भवेत् यस्य तिष्ठद्गृहे दीपस्तस्य नास्ति दरिद्रता आयुर्दः प्राङ्मुखो दीपो धनदः स्यादुदङ्मुखः प्रत्यङ्मुखो दुःखदः सौ हानिदो दक्षिणामुखः सं

५८ आयुर्दः प्राङ्मुखो दीपो धनदः स्यादुदङ्मुखः प्रत्यङ्मुखो दुःखदः सौ हानिदो दक्षिणामुखः सं

ध्यावंदनपूर्वमुक्तं तत्र विशेषव्यासः जपेद्वारुणमंत्रांस्तु इमंमेवरुणादिकान् चतुर्मंत्रान् वि

शेषज्ञः संध्याफलमवाप्नुयात् संध्यावंदनाकरणममदग्निः एकाहवाप्यतिक्रम्य संध्यावंदनक

र्मेच अहोरात्रोषितो भूत्वा गायत्र्या वायुतं जपेत् द्विरात्रे द्विगुणं प्रोक्तं त्रिरात्रे त्रिगुणं भवेत् त्रिरात्र

स्परतश्चैस्यान्मृद्र एव न संशयः कालातिक्रमे पारिजाते गौतमः संध्याकालेत्वतिक्रांते स्नात्वाचम्य

यथाविधि जपेदष्टशतं देवीं ततः संध्यां समाचरेदिति वसिष्ठस्तु कालातिक्रमणे चैव त्रिसंध्यमपि सर्व

दा चतुर्थार्घ्यं प्रकुर्वीत भानोर्व्याहृतिसंपुटं यमस्तु प्राणायामत्रयं प्रातः संगवे द्विगुणं भवेत् मध्या

न्हे त्रिगुणं प्रोक्तं मपराण्हे चतुर्गुणं सायान्हे पंचगुणकं संध्यातिक्रमणे भवेत् यदादौ ध्यतिमंत्रैर्वैस

त्यास्त्वपेद्यदि अकाले कुर्वतः कर्म काले कालेरुतातितु भवतीति शेषः श्राद्धभोजने तु गर्गः दशाद्ब राम

५८

त्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ततः संध्यामुपासीत शुद्ध्येतु तदनंतरं इदं तु संध्याधि

कारार्थं न तु श्राद्धभोजनप्रायश्चित्तमिति नृसिंहः प्रायश्चित्तमेवेत्यन्ये तत्तु गुरुप्रायश्चित्तोतराशका

यिति अथ सायंहोमकालः कात्यायनः सूर्यस्तशैलं संप्राप्ते षड्भिरिहंगुलैः प्रादुष्करामग्नीनां

प्रातर्भासांच दर्शनात् तथा यावत्सम्यङ् नाव्यतेनभस्यर्क्षाणि सर्वशः नच लोहित्यमापैति तावत्

सायं च हूयत इति अथ स्वापः गार्ग्यः शुचिदेशे विविक्तं तु गोमयेनोपलेपयेत् वैदिके गारुडे मंत्रैर

भिमंत्र्य स्वपेत्ततः मंगल्यं पूर्णकुंभं तु शिरःस्थाने निधापयेत् अथो तु सुप्तपादस्तु स्वाचांतः श

यने शुचौ अभीष्टदेवतानां तु संस्मरन्मगलध्वनौ रात्रिसूक्तं जपेद्रात्रौ रात्रिसामभवन्तरः

क्षमः शांतः तथा पूर्वरात्रे व्यतीतोऽनंतरं तु सगच्छेदिति मदिर पादौ प्रक्षाल्य पूर्व पश्चाद्विन्यासमावि

शेत् अथ रतिः सस्मृत्य परमात्मानं पत्नीजंघे प्रसारयेत् योनिस्पृष्ट्वा जपेत्सूक्तं विष्णुर्योनिंश

जापते रेतः सिंचतो यान्यात्समाद्गर्भं बिभर्तीति याज्ञवल्क्यः षोडशर्तुनिशाः स्त्रीणां तस्मि

न्युग्मासु संविशेत् ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रस्तु वर्जयेत् यथाकामी भवेद्वापि स्त्रीणां वरम

Indira Gandhi National
Centre for the Arts

आ॰म॰ नुस्मरन्निति कामं तु ऋतुकालाभिगामित्वं स्वदारेषु कृतात्मनः पर्ववर्जं गृहस्थस्य ब्रह्मचर्यमुदाहृ
५९ मिति एवं प्रकारेण गच्छतः श्राद्धादौ ब्रह्मचर्यक्षतिदोषः इति मिताक्षरायां पंचदशदिनपर्यंतं गम
नाभावे यदि न च श्राद्धप्रसक्तौ तद्दिने गच्छतो दोषाभावपरमिति हेमाद्रिप्रमाणेन तत्र मिथ्यं मनुः ता
सामान्यश्चतस्रस्तु निंदितैकादशी तिथा त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रय इति तथा
अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनं कृत्वा सचैलस्नातस्तु वारुणीभिश्च मार्जयेत् इति
मनुः अमावास्याष्टमीं चैव पूर्णमासीं चतुर्दशीं ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विज इति
स्त्रीणां तु प्रेक्षणात्स्पर्शात् हास्यशृंगारभाषणात् स्पंदते ब्रह्मचर्यं च न दारेष्वृतिसंगमादिति
कृतौ तु गर्भशंकित्वात्स्नानं मैथुने निःस्रुतं अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवदिति विष्णुपु॰
कृतौ तु गर्भशंकित्वात्स्नानं मैथुने निःस्रुतं ... रत्यादादर्शने च भुक्त्वा सायं ततो गृही अगच्छद्यामसुरिता मपि दारुमयीं नृपति
न विशालां न वै भग्नां नासमां मलिनां न च न च जंतुमयीं शय्यामधितिष्ठेदनास्तृतां गच्छे

यशायनार्थमिति शेषः शयनविधिं महाहारितः स प्रक्षालितचरणः सर्वतो रक्षां कृत्वा पू
र्णघटादि मंगलोपेत आत्माभिरुचितास्त्रामाणमिति पठन् शय्यामधितिष्ठेत् परात्रिसू
क्तं जप्त्वा विष्णुं नमस्कृत्य सर्पापसर्पभद्रं ते इत्येतच्छ्लोकद्वयं जप्त्वेष्टदेवतास्मरणं कृत्वा समाधिमा
स्थायां चान्यान्वैदिकान्मंत्रान् सावित्रीं जप्त्वा मंगलस्तुतिं शास्त्रं च शृण्वन्दक्षिणशिराः स्वपेदि
ति विष्णुपुराणे रात्रिसूक्तं जपेत्स्मृत्वा देवांश्च सुखशायिनः नमः स्कृत्वाव्ययं विष्णुं समाधि
स्वपेन्निशीति सुखशायिनो देवाः गोभिलेन दर्शिताः अगस्तिर्माधवश्चैव मुचुकुंदो महा
मुनिः कपिलो मुनिरास्तीकः पंचैते सुखशायिन इति दक्षिणशिरा इति प्रदर्शनार्थं तथा
विष्णुपुराणे प्राच्यां दिशि शिरश्शस्तं याम्यायामथवा नृप सदैव स्वपतः पुंसो विपरीतं तु रो
६० गदमिति हारीतोपि न चिय गुरुदक् प्रत्यक्शिराः कोणशिराः पश्चिमशिरा उत्तरशिराश्च
आ॰म॰ ति दिग्विशेषेण फलविशेष उक्तो मार्कंडेये प्राक्शिराः शयने विद्याद्धनमायुश्च दक्षिणे

Indira Gandhi National Centre for the Arts

आ॰म॰ गे पश्चिमे प्रबलां चिंता हानिर्मृत्युरथोत्तरे स्थलावराफलविशेषमाह गार्ग्यः स्वगेहे
६० प्राक्शिराः शयने श्वासुर्ये दक्षिणाशिराः प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः इति ग
यानि कानि च पुण्यानि यत्किंचिदनुलेपनं अलक्ष्मीपरिहारार्थं नित्यं कुरु युधिष्ठिर शयने
वर्ज्यस्थानान्याह मार्कंडेयः शून्यालये श्मशाने च एकवृक्षे चतुष्पथे महादेवगृहे चापि मातृ
वेश्मनि न स्वपेत् न यक्षनागायतने स्कंदस्यायतने तथा कुलच्छायासु च तथा शर्करालोष्टपांसु
षु न स्वपेच्च तथा दर्भे विना दीक्षां कथंचन धान्यगोधनविप्राणां गुरूणां च तथोपरि नाका
शे सर्वतः शून्ये न च चैत्यद्रुमे तथेति निषिद्धशय्योक्ता विष्णुपुराणे नाविशालां न वा भग्नां
नासमां मलिनां तथा न च दंतमयीं शय्यामधितिष्ठेत् नास्तृतां दंतमयीं मृतहस्तिदंतमयी
मीत्यर्थः तथा च तत्रैव मृतदंतमये विद्धं दर्भे पिलाशजे नाशयीत नरो धान्ये शयने पक्वदा
रुजे पंचदारुणि वा क्वापि नित्यजे द्रुमास्तथा अश्मपोठोत्थितांश्चैव घटसिक्ततरूंस्तथा करि रम
६०

भग्नकूले चैव न शयीत कदाचन इति स्वापकालमाह दक्षः प्रदोषपश्चिमौ यामौ वेदाभ्यासे
न योजयेत् यामद्वयं शयानस्तु ब्रह्मभूयाय कल्प्यत इति तथा निद्रासमयमासाद्य ताम्बूलं
वदनात्त्यजेत् पर्यंकात्प्रमदां भालात्पुंड्रं पुष्पात् इति शयनविधिः तदेवमुक्तमाह्निकमेतत्
अकरणे प्रत्यवायश्रुतेः कामं इत्येतदाखिलं प्रोक्तमहन्यहनि वै द्विजाः ब्राह्मणानां कृत्यजा
तमपवर्गफलप्रदं नास्तिकादथवालस्याद्ब्राह्मणो न करोति यः स याति नरकान्घोरान्का
कयोनौ च जायत इति नान्यो विमुक्तये पंथा मुक्ताश्रमविधिस्वकं तस्मात्कर्माणि कुर्वीत तु
ष्टये परमेष्ठिन इति अथ रात्रौ स्वप्नफलनिर्णयः तत्रादौ स्वप्नदर्शनावस्थामाह वैद्यः सर्वेंद्रि
यपुरतो मनोऽनुपरतं यदा विषयेभ्यस्तदा स्वप्नं नानारूपं प्रपश्यति स च स्वप्नो द्विविधः इष्टफ
लो निष्टफलश्चेति तत्र फलसामान्यतो इष्टफलो यथा नदीसमुद्रतरणमाकाशगमनं तथा
भास्करोदयनं चैव प्रज्वलितं हुताशनं ग्रहनक्षत्रताराणां चन्द्रमण्डलदर्शनं हर्म्यस्यारोहणं

Indira Gandhi National
Centre for the Arts

चैत्यप्रासादशिरसो गिरा एवमादीनि संदृश्य स नरः सिद्धिमाप्नुयात् स्वप्नेषु मदिरापानं वसाभासस्य भक्षणं क्रिमिविष्टानुलेपनं च रुधिरेणाभिषेचनं भोजनं दधिभक्तस्य श्वेतवस्त्रानुलेपनं रत्नान्याभरणादीनि स्वप्ने दृष्ट्वा प्रसिध्यति देवविप्रद्विजश्छत्रं तु वृषं कुञ्जं पार्थिवान् सुहृत्पुष्पांबरधरां प्रशस्ताभरणां गतां वृषभपर्वतौ क्षीरफलीरक्षाधिरोहणं दर्पणमिषमाल्याधिस्तरणं च महाभसां दृष्ट्वा स्वप्नेऽर्थलाभः स्याद्व्याधिमुक्तश्च जायते इति सामान्यानि ष्फलानि यथा यूपकिंशुकवल्मीकपारिभद्राधिरोहणम् तैलकार्पासपिण्याकलोहानां क्षिविपत्तये विवाहकरणं स्वप्ने रक्तस्रग्वस्त्रधारणं स्रोतसाहरणं नेष्टं पञ्चमासस्य भोजनानि भवति तदेवं द्विविधस्यापि स्वप्नदर्शनकालभेदेन फलभेदः स्वप्नाध्याये स्वप्नेषु प्रथमयामे संवत्सरविपाकतः द्वितीये चाष्टभिर्मासैस्त्रिभिर्मासैस्त्रियामिके अरुणोदयवेलायां दशाहेन फलं भवेत् गोविसर्जनवेलायां सद्य एव भवेदिति अथ विशेषतः शुभफलाः स्वप्नाः ६१

---

यस्तु पश्यति वै स्वप्ने राजानं कुञ्जरं हयं सुवर्णं वृषभं गां वा कुटुम्बं तस्य वर्धते आरोहणं गोवृषकुञ्जराणां प्रासादशैलाग्रवनस्पतीनां विष्टानुलेपो रुदितं मृतं च स्वप्ने ष्वगम्यागमनं च धन्यं क्षीरारिणः फलिनं रक्ष्म काकिया धिरोहति तत्रस्थश्च विबुध्येत धनं शीघ्रमवाप्नुयात् दधिलाभे भवेदर्थो घृतलाभे ध्रुवं यशः यस्य श्वेतेन सर्पेण ग्रस्यते दक्षिणः करः सहस्रलाभस्तस्य स्यात् पूर्णे दशमे दिने उरगो वृश्चिको वापि जलौकाः सलिलान्तरं विजयं वा अर्थसिद्धिं च पुत्रं तस्य विनिर्दिशेत् प्रासादं शैलमारुह्य समुद्रं तरते नरः अपि दासकुले जातो राजा भवति वै ध्रुवं यस्तु मध्ये तडागस्य भुंक्ते च घृतपायसं अरंबुपुष्करपत्रे तं विद्यात्पृथ्वीपतिं बलाकां कुकुटीं क्रौञ्चीं दृष्ट्वा यः प्रतिबुध्यति कुलजां लभते कन्यां भार्यां सप्रियवादिनीं निगडैर्बध्यते यस्तु बहुपाशेन वा पुनः पुत्रो वा जायते तस्य धनं शीघ्रमवाप्नुयात् आसने शयने याने शरीरे वाहने गृहे ज्वलमाने विबुध्येत तस्य श्रीः सर्वतोमुखी आदित्यमण्डलं स्व

Indira Gandhi National
Centre for the Arts

आ॰ म॰ ६२ ॥ प्नेचन्द्रं वा यदि पश्यति व्याधितो मुच्यते रोगादरोगः श्रियमाप्नुयात् रुधिरं पिबति स्वप्ने
सुरां वापि तथा नरः ब्राह्मणो लभते विद्यामितरो लभते धनं शुक्लाम्बरधरा ना
री शुक्लगंधानुलेपना अवगूहति यस्स्वप्ने श्रियं तस्य विनिर्दिशेत् पादुकोपानहौ छत्रं लब्ध्वा यः
प्रतिबुध्यते असिं वा निर्मलं तीक्ष्णं साध्वसं तस्य निर्दिशेत् रथं गोवृषसंयुक्तमेकाकी यः प्ररोहति
तत्रस्थः स विबुध्येत धनं शीघ्रमवाप्नुयात् दधिलाभो भवेदर्थो घृतलाभे ध्रुवं यशः घृताशने ध्रुवं क्ले
शायश्चास्य दधिभक्षणे अन्ने रक्तं बहिःस्थितायां चेन्नगरे पितृगृहे पिता गृहे माता लिकाराजा नगर पाथि
वो भवेत् मानुषाणि तु मांसानि स्वप्ने तत्र यस्तु पश्यति दुरितानि पक्वानि शृणु तस्य तु यत्फलं पदक्ष
णे शतलाभः सहस्रं बाहुभक्षणे राज्यं शतसहस्रं वा भवेद्वै शीर्षभक्षणे सर्वाणि शुक्लान्यतिशो
भनानि कार्पासभस्मोदन तक्रवर्ज्यं सर्वाणि कृष्णान्यतिनिन्दितानि गोहस्तिदेवद्विजवाजिवर्ज्यं
क्षीरं पिबति यस्स्वप्ने सपनं दोहनं कृते सोमपानं भवेत्तस्य यत्का रागाण्यशेषतः दधिदुग्धा एम ६२

भयो लोकि: गोमूत्र माश्च धनागमः यवान्यन्नागमं विद्यात् लाभं सिद्धार्थकानां नागपत्रं
भवेत् स्वप्ने कर्पूरमगरुं तथा चन्दनं पाण्डुरं पुष्पं तस्य श्रीः सर्वतो मुखी इति अथ विशेषतोऽनि
ष्टफलाः स्वप्नाः तत्र शौनकः अथ स्वप्नानि वक्ष्यते दुर्निमित्ताद्भुतानि च आदित्यं वाथ चन्द्रं
वा विगतच्छविकं तथा पतन्तं वाथ नक्षत्रं तारकां वाथ वा यदि वीक्षते मानवस्स्वप्ने मरणं शोकमाप्नुया
त् स्वप्नाध्याये अशोकं करवीरं च पलाशं वाथ पुष्पितं स्वप्नान्ते यत्फलं पश्येत नरः शोकमवाप्नुया
त् नावमारोहये यस्तु नदीं वापि समुत्तरेत् प्रवासं निर्दिशेत्तस्य शीघ्रं च पुनरागमं रक्ताम्बरध
रा नारी रक्तगंधानुलेपना अवगूहति यस्स्वप्ने मरणं तस्य विनिर्दिशेत् केशा यस्य विशीर्यन्ते दन्ता
यदि पतन्ति चेत् अर्थनाशो भवेत्तस्य पुत्रो वा यदि नश्यति खरोष्ट्रमाहिषरथमेकाकी यः प्र
रोहति तत्रस्थः स तु बुध्येत मरणं शीघ्रमवाप्नुयात् कर्णनासाकरादीनां छेदनं पङ्कमर्दनम्
पतनं दन्तकेशानां पक्वमांसस्य भक्षणं खरोष्ट्रमाहिषयानं तैलाभ्यंगं च मृत्यवे इति स्वप्नफलनिर्णयः

Indira Gandhi National
Centre for the Arts

आ॰म॰ अथस्वस्थारिष्टानि अरुंधतीं ध्रुवं चैव विष्णोस्त्रीणि पदानि वै आयुर्हीना न पश्यन्ति चतुर्थं
६३ मातृमण्डलं अर्कार्णश्रवणे यस्य न घोषं शृणुयात्तथा नभोमंदाकिनीमिंदोश्छायां नेक्षेद्गतायु
युषः पार्श्वयं कादिषु न्यस्तं खउयस्य पदं भवेत् पुरतः पृष्ठतो वापि सोष्टौ मासान्न जीवति
स्नानांबुलिप्तगात्रस्य यस्यास्यं प्राग्विरूक्ष्यति गात्रश्वार्द्रेषु सोर्धमासं न जीवति अथ दुःस्वप्नशा
न्तिमाह शौनकः एवमादीनी चान्यानि श्रुतस्मृतानि बहूनि च स्वप्नोत्पातानि चैतेषां कालरात्र्यधि
देवता पूजाविधानं पूर्वोक्तं कुर्यादत्रापि यत्नतः पूर्वोक्तमिति रात्रिसूक्तकल्पश्च ग्रंथगौरवभया
न्नालिखितः होमं कुर्यात्प्रयत्नेन रात्रावेव द्विजोत्तमः उक्तेनैव विधानेन सघृतं पायसं हुनेत्
उक्तेन विधानेन स्वगृह्योक्तइति प्रस्थं च पायसं हुत्वा रात्रीव्यस्यादिति क्रमात् अष्टोत्तरशतं हु
त्वा सूक्तेनानेन तथा स्वप्नाधिपतिमंत्रेण हुनेदष्टोत्तरशतं स्वप्नाधिपतिमंत्रेण कालरात्रमि
मंत्रेणेत्यर्थः ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् पूर्वोक्तमभिषेकं यत्तदत्रापि विधीयते ६३

---

आ॰म॰ पूर्वोक्तग्रहयज्ञोक्तमित्यर्थः गुरवे दक्षिणां दद्याद्वस्त्रं हेम पयस्विनीं यद्यत्सा दक्षिणाभावो यत्रा
६४ क्तो होमकर्मणि हिरण्यं दक्षिणां दद्यात्तदानीमेव वा बुधः वस्त्रकुंभादिसकलं तत्पात्रं प्रतिपा
दयेत् ब्राह्मणान्भोजयेद्भक्त्या सुशीलान्वेदपारगान् भक्ष्यैश्च पायसाद्याज्यैः स्वान्नानि सकव
हूनि च अनेन विधिना यस्तु शान्तिं कुर्वीत शक्तितः तस्य नर्षशतायुष्यं भवत्येव न संशय इति
चर्मण्वतीतरणिजांसुभसगमस्य सान्निध्यभाजि रसशालिनि मध्यदेशे ख्याता भरेहनगरी
भुवि तत्र राजा राजीवलोचनरतो भगवंतदेवः इति श्रीसेंगरवंशावतंस महाराजाधिराज श्री
भगवंतदेवोद्योजितेन मीमांसकशंकरभट्टात्मज भट्टनीलकंठकृते भगवंतभास्करे आचारमयूखो
द्वितीयस्समाप्तः

राम
६४

Indira Gandhi National
Centre for the Arts

Indira Gandhi National
Centre for the Arts